CC-0. In Public Domain. Digitization by eGangotri

FJAB-04

फलितज्योतिषम्

आचार्यसेतुः, चतुर्थपत्रम्

मुक्तस्वाध्यायपीठम्

(Institute of Distance Education)

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

प्रश्नभूषणम्

खण्डः

४

जयपराजयादिप्रश्नविचारः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

FJAB-04

प्रश्नभूषणम्

फलितज्योतिषाचार्यसेतुः,
चतुर्थपत्रम्

खण्डः

४

जयपराजयादिप्रश्नविचारः

त्रयोदशः पाठः ०५-१४

चतुर्दशः पाठः १५-२४

पञ्चदशः पाठः २५-३७

षोडशः पाठः ३८-४९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रधानसम्पादकः

प्रो॰ राधावल्लभत्रिपाठी

कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठलेखनम्

श्री मुकेशकुमारः

अतिथि प्राध्यापक (मु.स्वा.पी.)

राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)

जनकपुरी, नई दिल्ली-110058

(१३-१६ पाठाः)

सम्पादनम्

डॉ. विनोदकुमारशर्मा

उपाचार्यो ज्योतिषविभागाध्यक्षश्च

राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.वि.),

जयपुरपरिसरः, राजस्थानम्

पाठ्यक्रमसंयोजनम्

डॉ. श्यामदेवमिश्रः

वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनम्

डा. रमाकान्तपाण्डेयः

निदेशकः, मुक्तस्वाध्यायपीठम्

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनवर्षम् : २०१४, पुनर्मुद्रणम् : २०१५

ISBN : 978-93-82091-51-6

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

सर्वाधिकारः सुरक्षितः। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य लिखितरूपेणानुमतिम् अप्राप्य येन केनापि माध्यमेन अस्याः पाठ्यसामग्र्याः कञ्चिदप्यंशं पुनः प्रस्तोतुम् अनुमतिः नास्ति।

प्रयुक्तकागदम् - Agro-based environment Friendly.

पृष्ठविन्यासः

राजीवकुमारसिंहः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

संजयकुमारशर्मा
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

खण्डपरिचयः

आचार्यसेतुपाठ्यक्रमस्य चतुर्थपत्रे चतुर्थखण्डे भवतः स्वागतम्। तृतीयखण्डे भवान् विवाहप्रश्नानां योगानां च ज्ञानं, गर्भस्य शुभाशुभयोगानां गर्भप्रसव-क्षयादीनां च चिन्तनं पठितवान् अस्मिन् चतुर्थखण्डे वादि-प्रतिवादिनो जयपराजययोगविचारः, तयोः सन्धि-विग्रह-शस्त्राघातमरणयोगानां विचारः, दैनिकः शुभाशुभफलनिर्णयः, दैनिकग्रहदशा-दशाफलादिविचारः, क्रय-विक्रययोः लाभहानिविचारः, लग्नबलविचारः, धान्याधिपतिविचारः, द्रेष्काणवशात् रोगिणः शुभाशुभविचारः तथा च सर्वेषां भावानां विचारः इति एतेषां सरलरीत्या प्रतिपादनं वर्तते। एतेषां ज्ञानेन भवान् नूनमेव जयपराजय-दैनिकशुभाशुभग्रहफल-क्रयविक्रयलाभहानि-द्रेष्काणेन भावफल-विचारादिषु विषयेषु निपुणो भविष्यति। एवम् एते प्रमुखा विषयाः चतुर्थखण्डे अधिगन्तव्याः सन्ति।

१३.	त्रयोदशः पाठः	–	जय-पराजयप्रश्नविचारः
१४.	चतुर्दशः पाठः	–	दिनचर्याप्रश्नविचारः
१५.	पञ्चदशः पाठः	–	क्रय-विक्रयप्रश्नविचारः
१६.	षोडशः पाठः	–	द्रेष्काणवशात् विविधयोगविचारः

—•—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशः पाठः – जय-पराजयप्रश्नविचारः

पाठसंरचना

१३.१ प्रस्तावना
१३.२ उद्देश्यम्
१३.३ जय-पराजयप्रश्ने विचारणीयाः भावाः
१३.४ वादि-प्रतिवादिनो जय-पराजययोगविचारः
१३.४.१ जय-पराजयविषयकः अपरः योगः
१३.४.२ आचार्यनीलकण्ठस्य विशेषमतम्
बोधप्रश्नाः
१३.५ वादि-प्रतिवादिनः सन्धि-विग्रहयोगविचारः
१३.५.१ एतद्विषयकानि अन्येषाम् आचार्याणां मतानि
१३.६ वादि-प्रतिवादिनः शस्त्रादिभिः मरणयोगविचारः
बोधप्रश्नाः
१३.७ सारांशः
१३.८ शब्दावली
१३.९ सन्दर्भग्रन्थः
१३.१० सहायकग्रन्थाः
१३.११ बोधप्रश्नोत्तराणि
१३.१२ अभ्यासप्रश्नाः

१३.१ प्रस्तावना

प्रश्नभूषणस्य त्रयोदशे पाठे भवतः स्वागतम्। पूर्वस्मिन् पाठे भवता नष्टद्रव्यविषयकाः योगाः विस्तरेण अधीताः। तेषु नष्टद्रव्यप्रश्ने चौरनिर्णयः, नष्टधनस्य पुनर्लाभयोगाः, चोरितद्रव्यस्य स्थान-दिक्-मार्गादीनां ज्ञानार्थं विविधयोगाः च पठिताः। सम्प्रति विवादेषु जय-पराजयविषयकयोगान् अस्मिन् पाठे पठिष्यति। न्यायालयादिषु विवादप्रसङ्गाः अद्यत्वे सर्वत्र दृश्यन्ते। विवादेषु दोषः कस्य इति निर्णयः सुलभः नास्ति यतो हि उभयोः अपि वर्गयोः पक्षः सदा प्रबलः एव दृश्यते। एतादृशेषु प्रसङ्गेषु प्रश्नकर्मद्वारा 'कस्य पक्षस्य जयः भविष्यति' इति निर्णयार्थं केचन योगाः प्रतिपादिताः पूर्वाचार्यैः। तेषु योगेषु प्रश्नभूषणग्रन्थे निरूपिताः जय-पराजययोः प्रश्नविचारविषयाः अस्मिन् पाठे विस्तरेण निरुप्यन्ते। विवादप्रसङ्गे वादि-प्रतिवादिनो जय-पराजययोगविचारः, तद्विषये आचार्यनीलकण्ठवर्यस्य विशेषमतम्, वादि-प्रतिवादिनो सन्धियोगविचारः, शस्त्रादिभिः मरणयोगविचारादयो नैके विषयाः क्रमशः अत्र निरुप्यन्ते। एवं प्रकारेण पाठेऽस्मिन् जय-पराजयविषयकाणां बहुविधानां प्रश्नानां समाधानार्थं विविधयोगाः विचार्यन्ते।

१३.२ उद्देश्यम्

एतस्य पाठस्य अध्ययनेन भवान्–

- विवादप्रसङ्गे वादिनः जयो भविष्यति न वा इति निर्देष्टुं शक्ष्यति।
- विवादेषु प्रतिवादिनः जयो भविष्यति न वा इति निर्णेतुं शक्ष्यति।
- उभयपक्षयोः सन्धिः भवति न वा इति निर्णयं कर्तुं शक्ष्यति।
- वादि-प्रतिवादिनः शस्त्रेण मृत्युनिर्णये समर्थो भविष्यति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१३.३ जय-पराजयप्रश्ने विचारणीयाः भावाः

"वाच्याः सुतादयो भावाः परोक्षस्यापि पृच्छतः" इति प्रश्नमार्गग्रन्थस्य प्रसिद्धा उक्तिः। अनया उक्त्या प्रश्नकर्मणि भावानां महन्महत्त्वं सिद्धं भवति। प्रत्येकमपि भावस्य स्व-स्ववैशिष्ट्यं भवति, यतो हि बहुविधाः च विचाराः भिन्न-भिन्नभावेभ्यः प्रतिपाद्यन्ते। यद्यपि जय-पराजयप्रश्नविचारार्थं स्पष्टतया न कोऽपि भावः आचार्यैः निर्द्दिष्टः तथापि जय-पराजयविषयेषु सर्वेष्वपि योगेषु लग्नसप्तमभावयोः एव चर्चा दृश्यते। अतः लग्न-सप्तमभावौ वादि-प्रतिवादिनोः जय-पराजयप्रश्ने प्रमुखौ एव। तथैव द्वादशभावस्य प्राबल्यम् अपि अस्मिन् प्रकरणे अस्ति। तद्यथा–

"विवाहत्यागभोगानां दानादिकृषिकर्मणाम्।
व्ययं व्यये निरोधञ्च रिपूणां प्रविलोकयेत्॥ इति।

अस्मिन् श्लोके शत्रूणाम् अवरोधादिकं द्वादशभावादेव विचारणीयम् इति प्रतिपादितमस्ति। तन्नाम विवादादिषु शत्रूणां स्थितिः, विरोधः, अवरोधादयः विषयाः च अनेन भावेन विचार्यन्ते इति स्पष्टम् अवगम्यते। 'ताजिकनीलकण्ठी'ग्रन्थे आचार्यः नीलकण्ठः विवादविषयाः द्वादशभावेन विचारणीयाः इति स्पष्टयति। तद्यथा–

"पापा व्यये नेत्ररुजं विवादं-
हानिं धनानां नृपतस्करादेः।" इति।

अत्रापि विवादप्रश्नेषु द्वादशभावः एव विचारणीयः इति सिद्ध्यति। एवं प्रकारेण प्रश्नभूषणग्रन्थोक्तः विचारः नीलकण्ठाचार्यसमः। तस्मात् विवादप्रसङ्गे विशेषतः विचारणीयः अयमेव भावः इति।

१३.४ वादि-प्रतिवादिनो जय-पराजययोगविचारः

सामाजिकाः स्वजीवनस्य बहुविधसमस्यानां समाधानार्थं दैवज्ञस्य समीपं गच्छन्ति। ग्रहादिवशात् जायमानं प्रभावं ज्ञात्वा पूर्वजन्मनि कृतकर्मणां फलं च अभिज्ञाय दोषनिवारणार्थं प्रयत्नशीलाः भवन्ति, वाणिज्यादिषु धननिवेशात् पूर्वमेव स्व अनुकूलस्थितिं च ज्ञात्वा वाणिज्यम् आरभन्ते। तथैव न्यायालयगतेषु विवादादिषु कस्य पक्षस्य जयः भविष्यति इत्यस्य निर्णयार्थमपि बहवो जनाः दैवज्ञं पृच्छन्ति। तादृशे प्रसङ्गे वादिनः जयः भविष्यति उत प्रतिवादिनः इति निर्णयार्थं प्रश्नशास्त्रे विविधाः योगाः प्रतिपादिताः सन्ति। तेषु योगेषु वादि-प्रतिवादिनो जय-पराजययोगं प्रतिपादयति प्रश्नभूषणकारः आचार्यः जीवनाथझावर्यः –

मूलपाठः –

"वादिनो विजयप्रश्ने लग्ने क्रूरे तदा जयः।
यदि स्यात्सप्तमे क्रूरो विजयः प्रतिवादिनः॥

पदच्छेदः – वादिनः, विजय-प्रश्ने, लग्ने, क्रूरे, तदा जयः, यदि, स्यात्, सप्तमे, क्रूरः, विजयः, प्रतिवादिनः।

अन्वयः – विजयप्रश्ने लग्ने यदि क्रूरे तदा वादिनः जयः स्यात्। यदि सप्तमे क्रूरः (स्यात्) (तदा) प्रतिवादिनः विजयः (स्यात्)।

प्रतिपदार्थः – विजयप्रश्ने = मम विजयः स्यात् न वा इति प्रश्ने (कृते सति), लग्ने = प्रश्नलग्ने, यदि, क्रूरे = पापग्रहे, स्थिते सति, तदा, वादिनः = विवादप्रसङ्गे यायीजनस्य, (यः वादं करोति तस्य), जयः = विजयः, स्यात् = भवेत्। यदि सप्तमे = प्रश्नलग्नात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सप्तमस्थाने, क्रूरः = पापग्रहः, स्यात्, तदा प्रतिवादिनः = स्थायीजनस्य (यः विवादस्य प्रतिपक्षे भवति सः प्रतिवादी अथवा स्थायीजनः भवति) विजयः स्यात्।

भावार्थः – विवादेषु जय-पराजयप्रश्नविचारे दैवज्ञः कान् योगान् सम्यक् वीक्ष्य फलनिर्णयं कुर्यात् इति जिज्ञासायां प्रश्नभूषणकारः प्रथम-सप्तमभावयोः वैशिष्ट्यं प्रतिपादयति। तत्रापि पापग्रहस्थितिवशात् जयस्य पराजयस्य च निर्णयः कर्तव्यः इति तस्य अभिप्रायः। यदि प्रश्नलग्ने पापग्रहः भवति तदा वादीपक्षस्य जयः भवति यदि प्रश्नलग्नात् सप्तमे भावे पापग्रहः भवति तदा प्रतिवादिपक्षस्य जयः भवति इति।

अस्मिन् प्रकरणे वादी नाम कः? को नाम प्रतिवादी? इति प्रश्ने समुदिते समाधानं प्रतिपादितं प्रश्नभूषणस्य टीकाकारेण आचार्यगुरुप्रसादगौड़वर्येण। तद्यथा–

वादी = यायीजनः, अत्र 'यायी'पदस्य प्रयोगः तस्मै क्रियते यः विवादप्रसङ्गे कलहे वा आक्रान्ता, अग्रेसरः, विवादकर्ता च भवति अथवा न्यायालये वादस्य उपस्थापनं करोति स एव वादी अथवा यायीजनः उच्यते। प्रतिवादी = स्थायीजनः, स्थायीपदेन तु प्रतिप्रार्थिनः, रक्षणकर्तुः, विपक्षे स्थितस्य च स्वीकारः कर्तव्यः।

एवं प्रकारेण वादिनः जयः प्रश्नलग्ने पापग्रहस्थितिवशात्, प्रतिवादिनः जयस्तु सप्तमस्थाने पापग्रहस्य स्थितिवशात् भवति। उभयोः योगयोः स्पष्टतार्थं कुण्डल्यौ अपि अत्र प्रस्तूयते।

(१) वादिनः जययोगः



(२) प्रतिवादिनः जययोगः



अत्र प्रस्तुतयोः कुण्डल्योः प्रथमकुण्डल्यां प्रश्नलग्ने पापग्रहः कुजः वर्तते अतः वादिनः जयकारकः अयं योगः। द्वितीयकुण्डल्यां लग्नात् सप्तमस्थाने पापग्रहः शनिः विद्यते अतः प्रतिवादिपक्षस्य विजयप्रदायकः अयं योगः अस्ति।

१३.४.१ जय-पराजयविषयकः अपरः योगः

विवादेषु वादि-प्रतिवादिनो जय-पराजयविषयकयोगाः पूर्वं वर्णिताः। सम्प्रति केवलं विवादेषु अपितु शत्रुभिः जनितेषु उपद्रवेषु, कष्टेषु, युद्धादिषु विवादविषयकप्रश्नविचारे निर्णयार्थं केषाञ्चन योगानां प्रतिपादनं क्रियते। अपरः जय-पराजययोगः प्रतिपादितः प्रश्नभूषणे। तद्यथा–

मूलपाठे–

"शत्रोरुपद्रवे कष्टे विवादे वा रणाजिरे।
लग्ने पापे जयोऽवश्यं पापदृष्ट्या पराजयः॥"

स्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदच्छेदः – शत्रोः, उपद्रवे, कष्टे, विवादे, वा, रणाजिरे, लग्ने, पापे, जयः अवश्यं, पाप-दृष्ट्या, पराजयः।

अन्वयः – शत्रोरुपद्रवे, कष्टे, रणाजिरे विवादे वा लग्ने पापे अवश्यं जयः (स्यात्)। पापदृष्ट्या पराजयः (स्यात्)।

प्रतिपदार्थः – शत्रोरुपद्रवे = शत्रुभिः कृते उपद्रवे उत्पाते वा, कष्टे = कष्टविषयकप्रश्ने, रणाजिरे = रणप्राङ्गणे युद्धक्षेत्रे विद्यमाने, विवादे = विवादविषयके प्रश्ने वा, लग्ने = प्रश्नलग्ने, पापे = पापग्रहे विद्यमाने, अवश्यं = निश्चयेन, जयः = विजयः, स्यात् = भवेत्। पापदृष्ट्या = प्रश्नलग्ने क्रूरग्रहाणां दृष्टिवशात्, पराजयः स्यात्।

भावार्थः – जय-पराजयविषयकयोगेषु लग्नसप्तमभावयोः पापग्रहाणां स्थितिः आवश्यकी इति पूर्वं पठितमेव। सम्प्रति प्रोक्ते योगे न केवलं भावस्य महत्त्वम् अपितु दृष्टेः अपि महत्त्वं प्रतिपादितं प्रश्नभूषणकारेण। किञ्च शत्रुभिः कृतेषु उपद्रवेषु, क्लेशेषु विवादेषु च जयः प्राप्यते न वा? युद्धस्थले उत्पन्नविवादे च कस्य जयः भविष्यति? इत्यादिषु प्रश्नेषु अपि फलनिर्णयार्थं भाव-दृष्टिसम्बन्धयुक्तः योगः प्रतिपादितः आचार्यैः जीवनाथझावर्यैः। तद्यथा – शत्रोः उपद्रवविषयकेषु प्रश्नेषु सङ्कटप्रश्नेषु, विवादसम्बद्धप्रश्नेषु च प्रश्नकुण्डल्यां प्रश्नलग्ने यदि पापग्रहः भवति तदा वादिनः अवश्यं जयः भवति इति निर्णयः कर्तव्यः। अन्यच्च यदि प्रश्नलग्ने पापग्रहाणां प्रबला दृष्टिः भवेत् तदा वादिनः पराजयः अवश्यं भवति इति निर्णेतव्यम्। अस्मिन् प्रसङ्गे स्मर्तव्यम् अंशद्वयमेव विद्यते –

(१) प्रश्नलग्ने पापग्रहाणां स्थित्या वादिनः जयः भवति।

(२) प्रश्नलग्ने पापग्रहाणां दृष्ट्या वादिनः पराजयः भवति इति।

१३.४.२ आचार्यनीलकण्ठस्य मतम्

विवादेषु जय-पराजयप्रश्ने आचार्यः नीलकण्ठः स्वीये 'ताजिकनीलकण्ठी' ग्रन्थे विस्तारेण स्वमतम् उपस्थापयति। तद्यथा –

"क्रूरः खचरो लग्ने विवादपृच्छासु जयति विवादं तम्।
सर्वावस्थासु परं नीचेऽस्ते जयति न द्विषतः॥"

अर्थात् प्रश्नलग्ने क्रूरग्रहः अस्ति चेत् विवादप्रश्नेषु वादिनः पृच्छकस्य वा विजयः वक्तव्यः। यदि लग्नस्थ सः क्रूरग्रहः अस्तं गतः नीचस्थाने स्थितः वा भवति तदा शत्रोः उपरि जयः असम्भवः एव। अन्यच्च –

"लग्नद्यूने मुक्त्वा परस्परं क्रूरयोर्झकटदृष्टौ।
विवदद्वादियुगं तच्छुरिकाभ्यां प्रहरति तदैवम्॥"

अत्र आचार्यनीलकण्ठः पापग्रहदृष्टिवशात् विवादेषु परस्परकलहमपि प्रतिपादयति। तन्मतानुसारं लग्नं सप्तमभावं च विहाय पापग्रहेषु परस्परं ४/१० दृष्टिः भवति चेत् विवादे वादि-प्रतिवादिनोः छुरिकादिशस्त्रैः परस्परं कलहः भवति। एतद् अनन्तरं प्रश्नभूषणसमः एव जय-पराजययोगः प्रतिपादितः नीलकण्ठाचार्येण। तद्यथा –

"लग्ने द्यूने च यदि क्रूरखचरो विवादिनोर्न तदा।
कलहनिवृत्तिः काले जयति हि बलवान् गतबलन्तु॥"

अर्थात् प्रश्नलग्ने सप्तमस्थाने च पापग्रहः यदि भवति तदा विवादिनां कलहनिवृत्तिः न जायते, यदि प्रश्नलग्ने स्थितः पापग्रहः बली भवति तदा किञ्चित् कालानन्तरं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वादिनः विजयः, यदि च सप्तमलग्ने स्थितः पापग्रह बली तर्हि प्रतिवादिनः विजयः भवति इति निर्णयः कर्तव्यः।

बोधप्रश्नाः

१. जय-पराजयप्रश्ने केषां भावानां विशेषतः विचारणा क्रियते।

२. लग्ने क्रूरग्रहवशात् कस्य जयः वक्तव्यः?

३. सप्तमस्थाने केषां ग्रहाणां स्थितिवशात् प्रतिवादिनः जयः भवति?

४. उपद्रवप्रश्नेषु जयप्राप्त्यर्थं पापग्रहाणां कुत्र स्थितिः आवश्यकी?

५. प्रश्नलग्ने केषां दृष्टिवशात् वादिनः पराजयः वक्तव्यः?

६. लग्ने स्थितः क्रूरग्रहः अस्तंगतः नीचस्थितः चेत् किं फलम्?

७. लग्न-सप्तमस्थानयोः पापग्रहस्थित्या किं फलं जायते?

१३.५ वादि-प्रतिवादिनः सन्धिविग्रहयोगविचारः

विवादस्थलेषु न सर्वदा जयः पराजयश्च भवति अपि तु कदाचित् सन्धिः कदाचित् महान् विरोधः अपि सञ्जायते। तादृशी परिस्थितिः केषु ग्रहयोगेषु सम्भवति इति प्रतिपादनं सम्प्रति क्रियते। तद्यथा–

मूलपाठः – **''लग्ने च सप्तमे क्रूरावनयोर्बलिनो जयः।**
यदा द्वौ बलिनौ स्यातां सन्धिर्वा विग्रहो महान्॥''

पदच्छेदः – लग्ने, च, सप्तमे, क्रूरौ, अनयोः, बलिनो, जयः, यदा द्वौ, बलिनौ, स्यातां, सन्धिः, वा, विग्रहः, महान्।

अन्वयः – लग्ने सप्तमे च क्रूरौ (तदा) अनयोः बलिनो जयः (स्यात्)। यदा द्वौ बलिनौ स्यातां तदा सन्धिः वा महान् विग्रहो भवेत्।

प्रतिपदार्थः – लग्ने = प्रश्नलग्ने, सप्तमे = प्रश्नलग्नात् सप्तमस्थाने च, क्रूरौ = पापग्रहौ, यदि स्यातां तदा, अनयोः = द्वयोः, बलिनः = बलिष्ठस्य, जयः स्यात्। यदा द्वौ = लग्नसप्तमयोः स्थितौ उभौ पापग्रहौ, बलिनौ = समानरूपेण बलपूर्णौ, स्यातां = भवेतां तदा सन्धिः = वादि-प्रतिवादिनः परस्परं सन्धिः, वा = अथवा, महान्, विग्रहो = विच्छेदो विरोधो वा भवेत्।

भावार्थः – यथा जय-पराजयविषयकेषु अन्येषु योगेषु लग्न-सप्तमभावयोः एव अत्यधिकं महत्त्वं दृश्यते तथैव अस्मिन् सन्धिविग्रहयोगे अपि। यद्यपि प्रश्नभूषणकारः आदौ जय-पराजययोगानां कथनसन्दर्भे लग्न-सप्तमयोः पापग्रहस्थितिवशात् वादि-प्रतिवादिनोः जय-पराजयं स्पष्टयति। परन्तु उभयत्र लग्ने-सप्तमे च भावे पापग्रहाः सन्ति चेत् कस्य जयः वक्तव्यः अन्यच्च यदि लग्ने सप्तमभावे च विद्यमानौ क्रूरग्रहौ समानरूपेण बलशालिनौ तर्हि किं फलं भवेत् इति जिज्ञासाः उत्पद्यन्ते तत्समाधानं प्रकरणेऽस्मिन् समुपलभ्यते। तद्यथा-

(१) प्रश्नकुण्डल्यां यदि प्रश्नलग्ने सप्तमभावे च उभयत्रापि पापग्रहाः सन्ति चेत् तेषु पापग्रहेषु यः बली, तद्वशात् वादिप्रतिवादिनः एकतरस्य पक्षस्य जयः भवति।

उदाहरणम् – यदि प्रश्नलग्ने उच्चं गतः कुजः भवति, सप्तमभावे च शनिः विद्यते

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तर्हि प्रश्नलग्ने कुजस्य बलिष्ठत्वात् वादिनः जयः भविष्यति इति निर्णयः कर्तव्यः।

स्पष्टतया अवगमनार्थं कुण्डली अत्र प्रस्तूयते।



(२) प्रश्नकुण्डल्यां यदि लग्न-सप्तमयोः विद्यमानाः पापग्रहाः समानबलयुक्ताः भवन्ति तदा द्वयोः पक्षयोः परस्परं सन्धिः भवति अथवा महान् विरोधः उत्पद्यते।

एवं प्रकारेण लग्न-सप्तमभावयोः स्थितानां पापग्रहाणां बहुविधस्थित्या उत्पन्नयोगैः वादिप्रतिवादिनोः जय-पराजयविषयकप्रश्नानां निर्णयः स्फुटतया कर्तुं शक्यते।

१३.५.१ एतद्विषयकानि अन्येषाम् आचार्याणां मतानि

विवादेषु सन्धेः अथवा पूर्णतया विरोधस्य स्थितिः प्रश्नकुण्डल्यां कैः योगैः सम्भवति इति ज्ञानार्थम् आचार्याणां नीलकण्ठवर्याणां मतमपि अत्र प्रस्तूयते। तद्यथा –

"लग्नेशः सुतपः सौम्याः केन्द्रे सन्धिर्न वाऽन्यथा।
लग्नद्यूनेशषष्ठेशारित्वेऽप्यन्योन्यविग्रहः॥" इति।

अत्र द्वौ प्रमुखयोगौ प्रतिपादितौ।

(१) सन्धिकारकयोगः

(२) विग्रहकारकयोगः

(१) सन्धिकारकयोगे लग्नेशस्य पञ्चमेशस्य शुभग्रहाणां च केन्द्रभावेषु स्थितिः अनिवार्या। यदि लग्नभावस्य अधिपतिः, पञ्चमभावस्य अधिपतिः शुभग्रहाश्च प्रथम-चतुर्थ-सप्तम-दशमस्थानेषु स्थिताः भवन्ति तदा वादि-प्रतिवादिनः परस्परं सन्धिः भवति। एतद्विपरीतं यदि लग्नेशः, पञ्चमभावेशः शुभग्रहाश्च केन्द्रस्थानं विहाय अन्येषु भावेषु स्थिताः भवन्ति तदा सन्धिः न सम्भवति अपितु परस्परं विरोधः एव सञ्जायते, परस्परं कलहः अपि भवति।

(२) विग्रहकारकयोगेषु पूर्वोक्तः "लग्नेश-पञ्चमेश-शुभग्रहाणां केन्द्रात् बहिः स्थितिः" योगः एव विग्रहकारकः। अन्यत् तु लग्नेश-षष्ठेश-सप्तमेशेषु परस्परं शत्रुता भवति चेत् वादि-प्रतिवादिनः परस्परं कलहः एव सञ्जायते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१३.६ वादि-प्रतिवादिनः शस्त्रादिभिः मरणयोगविचारः

आधुनिके काले समाजे यत्र तत्र विवादाः जायमानाः दृश्यन्ते। तेषु विवादेषु कदाचित् वादिपक्षस्य जयः भवति कदाचित् प्रतिवादिपक्षस्य, कदाचित् उभयोः पक्षयोः मध्ये सन्धिः अपि जायते, बहुधा च विवादानन्तरं अधिका शत्रुता प्रवर्धते। एवं महान् विरोधे सति परस्परं युद्धस्य स्थितिः उत्पद्यते। जनाः परस्परं युद्ध्यन्तः अपरं मारयन्ति च। युद्धे कलहे च तादृशाः मरणयोगाः प्रश्नकुण्डल्यां कथं विचारणीयाः इत्येतदर्थं विवादप्रसङ्गे मरणयोगविषयके प्रश्नविचारे प्रश्नभूषणग्रन्थे इत्थं प्रतिपाद्यते–

मूलपाठः –

''अथवा यत्र कुत्रस्थौ पापौ पूर्णदृशा मिथः।
पश्यतोऽस्त्रप्रहारेण वादिनोर्मरणं भवेत्॥''

पदच्छेदः – अथवा, यत्र, कुत्रस्थौ, पापै, पूर्ण-दृशा, मिथः, पश्यतः, अस्त्र-प्रहारेण, वादिनः, मरणं, भवेत्।

अन्वयः – अथवा यत्र कुत्रस्थौ पापौ मिथः पूर्णदृशा पश्यतः (तदा) अस्त्रप्रहारेण वादिनः मरणं भवेत् (इति वाच्यम्)।

प्रतिपदार्थः – अथवा = पूर्वोक्तयोगाद् अतिरिच्य, यत्र कुत्रस्थौ = यस्मिन् कस्मिन् अपि स्थाने भावे वा स्थितौ, पापौ = पापग्रहौ, मिथः = परस्परं, पूर्णदृशा = सम्पूर्णदृष्ट्या, पश्यतः = अवलोकयतः, तदा अस्त्रप्रहारेण = खड्गादीनाम् अस्त्राणां प्रहारेण, वादिनः = वादकर्तुः, मरणं = मृत्युः भवेत् इति निर्णयः वक्तव्यः।

भावार्थः – विवादेषु वादि-प्रतिवादिनो मरणसम्भवकारकाः योगाः सम्प्रति प्रतिपाद्यन्ते। अत्र मरणयोगेषु भावानां न तथा वैशिष्ट्यम् उक्तं यथा दृष्टेः। दृष्टिवशात् एव वादिनः प्रतिवादिनः वा मरणम् उच्यते। आचार्यः जीवनाथझावर्यः प्रतिपादयति यत् यस्मिन् कस्मिन् अपि भावे स्थित्वा द्वौ पापग्रहौ परस्परं क्रूरदृष्ट्या पश्यतः चेत् अस्त्रादिभिः मरणयोगः सञ्जायते।

अत्र श्लोके 'वादिनः' इति पदेन यद्यपि विवादे वादिजनस्य एव स्वीकारः शक्यते किन्तु टीकाकाराणाम् आचार्यगुरुप्रसादगौड़वर्याणां कथनानुसारं पूर्वोक्तयोगे अस्त्रघातेन वादि-प्रतिवादिनो द्वयोरपि मरणं सम्भवेत् इति निर्णेतव्यम्।

बोधप्रश्नाः

८. सप्तमभावे बलिनः पापग्रहस्य स्थित्या कस्य जयः भवति?

९. केन योगेन वादि-प्रतिवादिनः सन्धिनिर्णयः कर्तव्यः?

१०. लग्न-पञ्चमेशयोः केन्द्रं विहाय अन्यस्थानेषु स्थितिः किं फलं जनयति?

११. केषां ग्रहाणां शत्रुताकारणात् विग्रहयोगः सम्भवति?

१२. द्वयोः पापग्रहयोः परस्परं क्रूरदृष्ट्या कः योगः भवति?

मूलपाठः

वादिनो विजयप्रश्ने लग्ने क्रूरे तदा जयः।
यदि स्यात्सप्तमे क्रूरो विजयः प्रतिवादिनः॥१॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लग्ने च सप्तमे क्रूरावनयोर्बलिनो जयः।
यदा द्वौ बलिनौ स्यातां सन्धिर्वा विग्रहो महान्॥२॥

अथवा यत्र-कुत्रस्थौ पापौ पूर्णदृशा मिथः।
पश्यतोऽस्त्रप्रहारेण वादिनोर्मरणं भवेत्॥३॥

शत्रोरुपद्रवे कष्टे विवादे वा रणाजिरे।
लग्ने पापे जयोऽवश्यं पापदृष्ट्या पराजयः॥४॥

१३.७ सारांशः

प्रियच्छात्र! पूर्वपाठेषु बहुविधप्रश्ननिर्णयान् भवान् पठितवान् एव। अस्मिन् पाठे भवता विवादप्रसङ्गेषु कस्य पक्षस्य जयः कस्य च पराजयः भवति इति सम्यग् अधीतम्। अस्मिन् जय-पराजयप्रश्नविचारे प्रमुखरूपेण चत्वारः अंशाः प्रतिपादिताः सन्ति-जय-पराजयप्रश्ने विचारणीयभावाः, जय-पराजययोगाः, सन्धि-विग्रहयोगाः विवादे शस्त्रादिभिः मरणयोगाश्च। एतैः चतुर्भिः अंशैः सूक्ष्मतया चिन्तनेन जय-पराजयविषयकेषु प्रश्नेषु निर्णयः कर्तुं शक्यते। प्रश्नभूषणग्रन्थे अयं पाठः यदि सूक्ष्मतया अवलोक्यते चेत् सर्वेषु अपि योगेषु लग्नभावस्य सप्तमभावस्य च अत्यन्तं प्राधान्यं दृश्यते। तदतिरिच्य प्रश्नविषयकेषु अन्यग्रन्थेषु लग्न-सप्तमभावौ विहाय द्वादशभावस्य प्राधान्येन विचारः कृतः। अतः लग्न-सप्तम-द्वादशभावानां सूक्ष्मतया अवलोकनेन जय-पराजयप्रश्नेषु स्पष्टतया निर्णयः कर्तुं शक्यते।

विवादे कस्य जयः भविष्यति इत्यस्य निर्णयः प्रश्नलग्ने सप्तमे स्थाने च क्रूरग्रहाणां स्थितिवशात् कर्तुं शक्यते। यदि प्रश्नलग्ने क्रूरग्रहः भवति तदा वादिनः जयः वक्तव्यः यदि सप्तमस्थाने क्रूरग्रहः भवति तदा तु प्रतिवादिनः विजयः निर्णेतव्यः भवति। जय-पराजयविषयकः अपरः योगः अपि प्रश्नभूषणकारैः प्रतिपादितः। तदनुसारं शत्रूणाम् उपद्रवेषु कष्टेषु विवादेषु च निर्णयार्थं यदि लग्ने पापग्रहः भवति तर्हि वादिनः अवश्यं जयः वक्तव्यः। प्रश्नलग्ने पापग्रहाणां प्रबलदृष्टिवशात् तु वादिनः अवश्यं पराजयः वक्तव्यः।

विवादसन्दर्भे वादि-प्रतिवादिनः सन्धेः सम्भावनाविषये लग्नसप्तमयोः क्रूरग्रहाणां बलं द्रष्टव्यं भवति। लग्ने सप्तमस्थाने च यदि पापग्रहाः भवन्ति तदा उभयत्र यः बली तद्वशात् फलं निर्णेतव्यम्। यदि प्रश्नलग्ने बली पापग्रहः भवति तदा वादिनः जयः, यदि सप्तमलग्ने बली पापग्रहः तदा प्रतिवादिनः जयः भवति। यदि उभयत्र समानबलिनौ भवतः तदा द्वयोः अपि पक्षयोः सन्धिः भवति अथवा महान् कलहः भवति।

अन्ततश्च वादि-प्रतिवादनो विवादेषु मरणयोगः उच्यते। यस्मिन् कस्मिन् अपि भावे स्थितयोः द्वयोः पापग्रहयोः यदि परस्परं पूर्णदृष्टिः भवति तदा अस्त्रप्रहारेण वादिनां मरणं भवति इति निर्णयः करणीयः। एवम्प्रकारेण अस्मिन् पाठे विवादप्रसङ्गे वादि-प्रतिवादिनः कस्य जयः भवति इति निर्णयार्थं केचन योगाः प्रोक्ताः सन्ति, यैः जय-पराजययोः निर्णयः कर्तुः शक्यते।

१३.८ शब्दावली

१.	वादिनः	-	यायीजनस्य, (विवादप्रसङ्गे यः वादं करोति सः वादी उच्यते)।
२.	प्रतिवादिनः	-	स्थायीजनस्य (विवादप्रसङ्गे यः प्रतिपक्षी भवति स एव प्रतिवादी उच्यते।)।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३.	लग्ने	-	प्रश्नलग्ने।
४.	अनयोः	-	उभयोः द्वयोः वा।
५.	विग्रहः	-	विच्छेदः विरोधो वा।
६.	शत्रोरुपद्रवे	-	शत्रुजनित-उत्पाते।
७.	रणाजिरे	-	युद्धप्राङ्गणे।
८.	पूर्णदृशा	-	सम्पूर्ण-दृष्ट्या।
९.	मिथः	-	परस्परम्।
१०.	पश्यतः	-	अवलोकयतः।

१३.९ सन्दर्भग्रन्थः

१. **प्रश्नभूषणम् - दैवज्ञजीवनाथझाप्रणीतम्, 'प्रेक्षा' 'सौम्या'** संस्कृत-हिन्दीव्याख्योपेतम्, व्याख्याकारः = आचार्यः गुरुप्रसादगौडः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००४।

१३.१० सहायकग्रन्थाः

१. **ताजिकनीलकण्ठी** - आचार्यनीलकण्ठविरचिता, हिन्दीव्याख्याकारः = पं. सीतारामझा, चौखम्बा विद्याभवन वाराणसी, २००७।

२. **षट्पञ्चाशिका**, डा. सत्येन्द्रमिश्रः, चौखम्बा संस्कृत संस्थान, वाराणसी।

३. **प्रश्नमार्गः**, हिन्दीव्याख्याकारः - आचार्यः गुरुप्रसादगौडः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७।

१३.११ बोधप्रश्नोत्तराणि

१. लग्न-सप्तम-द्वादशभावानाम्।

२. वादिनः।

३. क्रूरग्रहाणाम्।

४. प्रश्नलग्ने।

५. पापग्रहाणाम्।

६. शत्रोः उपरि जयः असम्भवः भवति।

७. विवादिनां कलहनिवृत्तिः न सम्भवति।

८. प्रतिवादिनः।

९. यदा लग्नसप्तमयोः समानबलिनौ पापग्रहौ भवतः तदा सन्धिः भवति।

१०. वादि-प्रतिवादिनः परस्परं विरोधः सञ्जायते।

११. लग्नेश-षष्ठेश-सप्तमेशाणाम्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१२. वादिनः मरणयोगः।

१३.१२ अभ्यासप्रश्नाः

१. विवादप्रसङ्गे वादि-प्रतिवादिनो जय-पराजययोगान् प्रतिपादयत।

२. जय-पराजयप्रश्नेषु विचारणीयान् भावान् नीलकण्ठादिमतप्रदर्शनपूर्वकं वर्णयत।

३. विवादप्रसङ्गे सन्धि-विग्रहयोगान् स्पष्टयत।

४. शस्त्रादिप्रहारेण वादिनः मरणयोगान् लिखत।

—•—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चतुर्द्रशः पाठः – दिनचर्या प्रश्नविचारः

पाठसंरचना

१४.१ प्रस्तावना
१४.२ उद्देश्यम्
१४.३ दैनिकशुभाशुभफलनिर्णयः
१४.४ दिनचर्यायां शस्त्रेण भययोगः
बोधप्रश्नाः
१४.५ दैनिकग्रहदशाविचारः
१४.६ दैनिकग्रहदशाफलविचारः
बोधप्रश्नाः
मूलपाठः
१४.७ सारांशः
१४.८ शब्दावली
१४.९ सन्दर्भग्रन्थः
१४.१० सहायकग्रन्थाः
१४.११ बोधप्रश्नोत्तराणि
१४.१२ अभ्यासप्रश्नाः

१४.१ प्रस्तावना

प्रियच्छात्र! वादि-प्रतिवादिनो जय-पराजयप्रश्ननिर्णययोगान् भवान् पूर्वस्मिन् पाठे पठितवान् एव। तत्र वादि-प्रतिवादिनो जय-पराजययोगान्, सन्धि-विग्रहयोगान्, शस्त्रादिभिः वादिनः मरणयोगान् च अभिज्ञातवान्। सम्प्रति अस्मिन् चतुर्द्रशे पाठे दैनिकशुभाशुभफलनिर्णयं सम्यक्तया ज्ञास्यति। जनानां सर्वसामान्यः अयं स्वभावः यत् प्रतिदिनं जीवने किं भविष्यति, के क्लेशाः सम्मुखाः भविष्यन्ति, कस्मिन् कार्ये लाभः भविष्यति इत्यादिप्रश्नानाम् उत्तरं ज्ञातुम् इच्छन्ति। अतः दैवज्ञस्य समीपं गच्छन्ति। एतेषां दिनचर्यासम्बद्धप्रश्नानां समाधानं कथं वक्तव्यम् इत्येतदर्थं पूर्वतनाः महर्षयः नानाविधान् ग्रन्थान् अरचयन्। तत्र हि आचार्यः जीवनाथझावर्यः प्रश्नभूषणग्रन्थं रचयित्वा दिनचर्याविषयकाणां प्रश्नानां समाधानार्थं विविधान् योगान् अकथयत्। तेषामेव योगानां प्रतिपादनं क्रमशः अस्मिन् पाठे करिष्यते। दिनचर्याविषयकेषु प्रश्नेषु दैनिक-शुभाशुभफलनिर्णयः, दिनचर्यायां शस्त्रेण भययोगः, दैनिकग्रहदशाविचारः, ग्रहदशाफलविचारादयः विषयाः विस्तारपूर्वकम् अत्र प्रतिपाद्यन्ते, येषाम् आधारेण कस्यापि पृच्छकस्य दिनचर्याविषयकाणां प्रश्नानां समाधानं दैवज्ञः शास्त्रप्रमाणपूर्वकं वक्तुं समर्थो भविष्यति।

१४.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान्–

- पृच्छकस्य दैनिकं शुभफलं निर्णेतुं शक्ष्यति।
- दैनिकम् अशुभफलं वक्तुं समर्थो भविष्यति।
- दिनचर्यायां शस्त्रेण भययोगं वर्णयितुं प्रभविष्यति।
- दैनिकं ग्रहदशाविचारनिर्णयं कर्तुं शक्ष्यति।
- दैनिकग्रहदशायाः फलनिर्णयं प्रतिपादयितुं समर्थो भविष्यति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१४.३ दैनिक-शुभाशुभफलनिर्णयः

प्रश्नभूषणग्रन्थे बहुविधप्रश्नानां फलनिर्णयार्थं बहवो हि योगाः वर्णिताः आचार्यजीवनाथझावर्यैः। दिनचर्यायाः प्रश्नेषु अद्यतनं दिनं शुभं भवति वा अनिष्टकरं इति प्रश्नस्य फलनिर्णयार्थं चन्द्रस्य महान् प्रभावः प्रतिपादितः वर्तते। चन्द्रग्रहस्य प्रश्नलग्ने स्थितिः अथवा सप्तमलग्ने स्थितिः एव सम्पूर्णदिनस्य शुभाशुभं निर्धारयति। तदुच्यते –

मूलपाठः –

''लग्नगो दिनचर्यायां सप्तमस्थोऽपि चन्द्रमा।
कुरुते शोभनं सर्वं विपरीतमतोऽन्यथा॥''

पदच्छेदः – लग्नगः, दिनचर्यायां, सप्तमस्थः, अपि, चन्द्रमा, कुरुते, शोभनं, सर्वं, विपरीतम्, अतः, अन्यथा।

अन्वयः – दिनचर्यायां लग्नगः सप्तमस्थोऽपि चन्द्रमा सर्वं शोभनं कुरुते अन्यथा विपरीतं (कुरुते)॥

प्रतिपदार्थः – दिनचर्यायां = दिनस्य चर्यायां (अद्यतनं दिनं शुभं भवति न वा इति दिनचर्याप्रश्ने), लग्नगः = प्रश्नलग्नं गतः लग्ने स्थित इत्यर्थः, सप्तमस्थः = सप्तमस्थाने स्थितः, अपि चन्द्रमा = चन्द्रग्रहः, सर्वं = समग्रं, शोभनं = शुभं कुरुते। अन्यथा = लग्नं सप्तमं च स्थानं विहाय अन्येषु भावेषु स्थितः चन्द्रमा, विपरीतं = विरुद्धं कुरुते इति निर्णयः कर्तव्यः।

भावार्थः – दिनचर्याप्रश्नेषु अद्यतनदिनस्य शुभत्वम् अशुभत्वं च प्रतिपाद्यते चन्द्रग्रहस्य प्रभावेण एव। अयं हि चन्द्रग्रहः प्रश्नलग्ने स्थितः भवति अथवा लग्नात् सप्तमस्थाने स्थितः भवति तदा सर्वप्रकारेण अद्यतनं दिनं शोभनमेव भवति।

अत्र 'शोभनम्' इति पदस्य अर्थः तद्दिने उत्तमानि वस्त्राणि, स्वादिष्टं भोजनम्, उत्तमानां सङ्गतिः, धन-धान्यादीनां सुखं च उपलभ्यते इति ज्ञातव्यम्।

लग्नं सप्तमं च विहाय अन्येषु भावेषु स्थितः चन्द्रः तद्विपरीतम् अर्थात् अशुभं करोति इति ज्ञातव्यम्। अर्थात् दिनचर्याविषयके प्रश्ने चन्द्रग्रहस्य द्वितीय-तृतीय-चतुर्थ-पञ्चम-षष्ठ-अष्टम-नवम-दशम-एकादश-द्वादशभावेषु स्थितिः न शुभकरी। पूर्वोक्तेषु भावेषु स्थितः चन्द्रः तद्दिने कष्टं दुःखं च ददाति। भोजन-धन-सुख-सत्सङ्गति-इत्यादीनां नितराम् अभावः अथवा अप्राप्तिः तद्दिने भवति। अस्मिन् प्रकरणे दैनिकशुभाशुभफलनिर्णये विषयद्वयमेव प्रामुख्येन अवगन्तव्यम् –

(१) प्रश्नलग्ने अथवा सप्तमे भावे चन्द्रग्रहस्य स्थितिवशात् आदिनं सर्वं शुभकरं भवति।

(२) चन्द्रग्रहस्य द्वितीय-तृतीय-चतुर्थ-पञ्चम-षष्ठ-अष्टम-नवम-दशम-एकादश-द्वादशभावेषु स्थितिवशात् आदिनं सर्वं क्लेशकरम् अशुभं च भवति इति।

१४.४ दिनचर्यायां शस्त्रेण भययोगः

ज्योतिश्शास्त्रे सामान्यतः इयम् अवधारणा अस्ति यत् यस्मिन् कस्मिन्नपि भावे स्थिताः पापग्रहाः पापफलं प्रयच्छन्ति शुभग्रहाश्च शुभफलम्। फलमपि तत्तद् ग्रहस्य प्रकृत्यनुसारमेव लभ्यते। दिनचर्याप्रश्नविचारे अपि अयमेव निर्णयः भवति। लग्न-सप्तमादिषु शुभभावेषु स्थितः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चन्द्रः समग्रं दिनं शुभमेव करोति। अयमेव चन्द्रः अष्टमादिषु अनिष्टभावेषु क्रूरैः सहः स्थितः दिनचर्यायां पापफलमेव प्रयच्छति इत्यत्र नास्ति संदेहः। चन्द्रस्य क्रूरग्रहैः सह युतिः किं फलं जनयति, क्रूरग्रहाणां च दिनचर्यायां किं फलमिति सम्प्रति विचार्यते।

सुखदुःखयोः क्रमशः जीवने आवर्तनं जायते एव। तथैव दिनचर्यायामपि आह्लादः, हर्षः, खेदः, दुःखम्, भयमित्यादिकं जायमानमेव भवति। शस्त्रादिभिः प्रहरणस्य भीतिः दिनचर्यायां कदा जायते इति निर्णयार्थं प्रश्नभूषणग्रन्थे विशिष्टं योगं प्रतिपादयति आचार्यः जीवनाथझावर्यः। तद्यथा –

मूलपाठः –

''क्रूरो राहुः कुजो वाऽपि निजक्षेत्रेऽष्टमे भवेत्।
चन्द्रोऽपि यदि तत्रस्थः कुरुते शस्त्रजं भयम्॥''

पदच्छेदः – क्रूरः, राहुः, कुजः, वा, अपि, निज-क्षेत्रे, अष्टमे, भवेत्, चन्द्रः, अपि, यदि, तत्रस्थः, कुरुते, शस्त्रजं, भयम्।

अन्वयः – क्रूरः राहुः वा कुजः अष्टमे निजक्षेत्रे भवेत्, चन्द्रोऽपि यदि तत्रस्थः (स्यात् तदा) शस्त्रजं भयं कुरुते।

प्रतिपदार्थः – क्रूरः = पापः, राहुः = तमोरूपः राहुग्रहः, वा = अथवा, कुजः = मङ्गलग्रहः, अष्टमे = अष्टमे भावे स्थाने वा, निजक्षेत्रे = स्वराशौ भवेत्, चन्द्रः = चन्द्रग्रहः अपि यदि तत्रस्थः = अष्टमे भावे स्थितः स्यात् तदा शस्त्रजं = शस्त्रेण जातम्, भयं = भीतिं, कुरुते = करोति जनयति वा।

भावार्थः – कुजग्रहस्य राहोश्च प्रकृतिः एव ईषत्क्रूरा भवति। यथोक्तं बृहज्जातके – ''आरो वक्रः क्रूरदृक् आवनेयः'' इत्यादिकम्। राहोः विषये च ''राहुस्तमोऽगुरसुरश्च'' इत्यादि। अतः एतौ द्वावपि ग्रहौ यत्र कुत्रापि भवतः क्लेशम् अवश्यम् उत्पादयतः। चन्द्रग्रहः यद्यपि सौम्यः तथापि पापग्रहाणां युत्या, दृष्ट्या, अनिष्टस्थानेषु स्थित्या च बलहीनः भवति, अतः शुभफलदाने असमर्थः भवति।

दिनचर्यायां शस्त्रेण भययोगमपि अष्टमभावस्थिताः भौम-राहु-चन्द्रग्रहाः क्रूरग्रहाः च उपपादयन्ति। तद्यथा– स्वराशौ मेषे वृश्चिके वा स्थितः कुजः, प्रश्नकुण्डल्याम् अष्टमस्थाने चन्द्रग्रहेण सह तिष्ठति तदा शस्त्रजन्यं भयं पृच्छकेन तद्दिने अनुभूयते।

अन्ये पापग्रहाः अपि यदि कुजेन चन्द्रेण च युताः अष्टमस्थाने स्थिताः भवन्ति तदा शस्त्रप्रहारेण भीतियोगकराः भवन्ति। अत्र विशेषस्तु अयमस्ति यत् अष्टमभावः भय-चिन्ता-दुर्जन-रोगादीनां विषये चिन्तनीयः भवति। अतः भयकारकः अयं भावः इति स्पष्टं भवति। तदुक्तं प्रश्नभूषणे एव–

''रिपुसङ्ग्रामदुष्टानां मार्गस्यापि गदस्य च।
नद्युत्तारभयानाञ्च क्षिप्रं छिद्रे विचिन्तयेत्॥ इति।

अतः भयकारके अस्मिन् भावे स्वराशिस्थितः बलिष्ठः कुजः क्रूरग्रहैः सह प्रविशति चेत् इतोऽपि अधिकां क्रूरतामाप्नोति। कुजेन अग्नि-शस्त्रादिविषयाः विचार्यन्ते। अतः भयकारकभावे शस्त्रादिकारकः कुजः क्रूरग्रहैः सह तिष्ठति, चन्द्रस्य अपि यदि तत्रैव स्थितिः, तदा अवश्यं शस्त्रादिभिः पृच्छकस्य भयं जायते, इति निर्णयः कर्तव्यः।

स्पष्टतया अवगमनार्थं कुण्डली अत्र प्रस्तूयते –

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दिनचर्यायां शस्त्रभययोगकारककुण्डली



बोधप्रश्नाः

१. दिनचर्याप्रश्ने लग्नसप्तमयोः स्थितचन्द्रेण कीदृशं फलम् अनुभूयते?

२. दिनचर्याप्रश्ने चन्द्रस्य केषु भावेषु स्थितिः अशुभकरी?

३. शस्त्रजन्यभययोगे कुजस्य स्थितिः कस्मिन् राशौ आवश्यकी?

४. अष्टमभावगताः के ग्रहाः शस्त्रजन्यं भीतियोगं कुर्वन्ति?

५. ''क्रूरो राहुः कुजो.....'' इत्यस्मिन् श्लोके 'तत्रस्थः' इति पदस्य कोऽर्थः?

१४.५ दैनिकग्रहदशाविचारः

प्रश्नशास्त्रे पृच्छकस्य प्रश्नफलनिर्णयार्थम् अनेके प्रकाराः आचार्यैः उपकल्पिताः। ते हि विशेषतः, भाव-स्थान-दृष्टि-योग-दशादयः सन्ति। दशासु अत्यन्तं प्रमुखाः विंशोत्तर्यादयः प्रोक्ताः पराशराचार्यैः। तद्यथा –

''विंशोत्तरी तथा चाष्टोत्तरी वै षोडशोत्तरी।
द्वादशोत्तर्यथो पञ्चोत्तरी शतसमा तथा॥

दशाचतुरशीत्यब्दा द्विसप्ततिः समा तथा।
षष्ट्यब्दाऽपि च षट्त्रिंशद्वत्सरापि द्विजोत्तम॥ इति।

प्रश्नशास्त्रे दैनिकग्रहदशाविचारः विशेषेण क्रियते। तत्र विशिष्टां गणितप्रक्रियां विधाय दैनिकी ग्रहदशा निर्णीयते। ग्रहदशायाः निर्णयक्रमं प्रतिपादयति प्रश्नभूषणकारः –

मूलपाठः –

तिथ्यर्क्षवारयोगानां संख्या करणसंयुता।
नवाप्ता प्रश्नकालेऽर्कादियं दिनदशा नृणाम्॥

पदच्छेदः – तिथि-ऋक्ष-वार-योगानां, संख्या, करण-संयुता, नव, आप्ता, प्रश्न, काले, अर्काद् इयं, दिनदशा, नृणाम्।

अन्वयः – प्रश्नकाले तिथि-ऋक्ष-वार-योगानां करणसंयुता संख्या नवाप्ता इयं नृणाम् अर्थात् दिनदशा (भवति)।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपदार्थः – प्रश्नकाले = प्रश्नकरणसमये, तिथ्यर्क्षवारयोगानां = प्रतिपदादि-तिथीनाम्, अश्विन्यादिनक्षत्राणाम्, रव्यादि-वाराणाम्, विष्कम्भादियोगानां च संख्या, करणसंयुता = ब-बालवादिभिः करणैः संयुक्ता कार्या, (सा) नवाप्ता = नवसंख्यया भक्ता, इयम् = सम्प्राप्ता शेषसंख्या, नृणाम् = मनुष्याणां पृच्छकस्य वा, अर्काद् = सूर्यग्रहात्, आरभ्य दिनदशा = तद् दिनस्य दशा भवति।

भावार्थः – अस्मिन् दैनिकग्रहदशाविचारे सर्वादौ पञ्चाङ्गविषये पूर्णतया ज्ञातव्यं भवेत्। तिथिः नाम शुक्लकृष्णपक्षयोः प्रतिपदादयः तिथयः। याः संख्यायां प्रतिपक्षे पञ्चदश-पञ्चदश भवन्ति। शुक्लपक्षे चतुर्दश्यनन्तरं पूर्णिमा इति नाम्ना कृष्णपक्षे च पञ्चदशी तिथिः 'अमावास्या' इति नाम्ना व्यवह्रियते।

ऋक्षं नाम नक्षत्रम्, नक्षत्राणि अश्विन्यादयः सप्तविंशतिः सुप्रसिद्धानि एव। रविः सोम कुजादयः सप्तवारा अपि प्रसिद्धाः। विष्कम्भादयः योगाः सप्तविंशतिः भवन्ति। ते हि क्रमशः –

''विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा।
अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च॥

गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा।
वज्रः सिद्धिर्व्यतीपातो वरीयान्परिघः शिवः॥

सिद्धः साध्यः शुभः शुक्लो ब्रह्मा ऐन्द्रश्च वैधृतिः।
सप्तविंशतियोगास्तु कुर्युर्नामसमं फलम्॥''

करणानि आहृत्य एकादश वर्तन्ते। सप्तचरकरणानि चत्वारि हि स्थिरकरणानि। चरकरणानि यथा –

''बवश्च बालवश्चैव कौलवस्तैतिलस्तथा।
गरश्च वणिजो विष्टिः सप्तेतानि चरानि च॥''

स्थिरकरणानि यथा –

''कृष्णपक्षे चतुर्द्रश्यां शकुनिः पश्चिमे दले।
चतुष्पादश्च नागश्च अमावास्यादलद्वयोः॥''

''शुक्लप्रतिपदायास्तु किंस्तुघ्नः प्रथमे दले ।
प्रश्नसमये स्थिरान्येतानि चत्वारि करणानि जगुर्बुधाः॥''

तिथि-नक्षत्र-वार-योग-करणेषु यत्संख्यकाः तिथ्यादयः स्युः ताः संख्याः संयुक्ताः कार्याः। संकलिता संख्या नवसंख्यया विभक्ता कार्या, शेषरूपेण या संख्या समुपलभ्यते तत्संख्यकस्य सूर्यादिग्रहस्य एव तद्दिने दशा वक्तव्या। यथा– यदि एकाङ्कः अवशिष्यते तर्हि रविदशा, द्विशेषे चन्द्रदशा, त्रिशेषे भौमदशा इत्यादयः। स्पष्टतया अवगमनार्थम् एकमुदाहरणमत्र प्रस्तूयते –

उदाहरणम् –

२०५९ तमे विक्रमसंवत्सरे, १९२४ तमे शकाब्दे पौषमासे शुक्लपक्षे प्रतिपत्तिथौ केनचित् पृच्छकेन दिनचर्यायाः विषये प्रश्नः कृतः। तस्मिन् दिने तत्समये पञ्चाङ्गविवरणं क्रमशः एवं प्रकारेण आसीत् -

(१) तिथिः = प्रतिपत् (प्रतिपत्-तिथ्यादिगणनया एक (१) संख्या ग्राह्या)

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२) वासरः = शुक्रवारः (अर्कादितः गणनया शुक्रवारस्य संख्या ६ भवति)

(३) नक्षत्रम् = पूर्वाषाढा (पूर्वाषाढानक्षत्रस्य संख्या = २०)

(४) योगः = व्याघातः (व्याघातयोगस्य संख्या १३)

(५) करणम् = किंस्तुघ्नम् (तत्संख्या ११ भवति)

प्राप्तानां सर्वासां संख्यानां योगं कृत्वा शेषः ज्ञातव्यः। अत्र हि १ + ६ + २० + १३ + ११ = ५१

योगः ५१ लब्धः। अयं योगः नवसंख्यया विभक्तः = $51 \div 9$, शेषः = ६, लब्धिः = 5, शेषे गृहीते सति अर्कादिक्रमेण गणना कृता चेत् 6 संख्यया शुक्रः प्राप्यते। अतः पृच्छकस्य दिनचर्याप्रश्ने तद्दिने शुक्रग्रहस्य दशा अस्ति इति निर्णयः कर्तव्यः। अयमेव क्रमः अन्येषु दिवसेषु अपि अनुवर्तनीयः। एवम्प्रकारेण प्रतिदिनस्य दशा दशेशश्च निर्णेतुं शक्यते।

१४.६ दैनिकग्रहदशाफलविचारः

इतः प्राक् नवग्रहाणां दैनिकी दशा कथं निर्णेतव्या इति भवान् सम्यक् पठितवान्। सम्प्रति तेषां ग्रहाणां दशाकाले जनैः कीदृशं फलम् अनुभूयते इति विचारः क्रियते। प्रश्नशास्त्रे प्रतिपादितं ग्रहाणां दशाफलं यद्यपि बृहज्जातकादिग्रन्थेषु प्रोक्तफलवद् एव। तथापि कश्चन भेदस्तु दृश्यते। फलितशास्त्रे ग्रहाणां दशायाः फलविचारकाले ग्रहाणां बलाबलत्वम् अवश्यमवलोक्यते। यदि ग्रहः शुभस्थाने शुभैः सह युतः, शुभैश्च दृष्टः भवति तदा दशाकाले तत्फलमपि शुभमेव लभ्यते। अशुभस्थाने विद्यमानग्रहाणां दशाफलम् अपि अशुभमेव। किन्तु प्रश्नभूषणग्रन्थे दैनिकग्रहदशायाः फलविचारसमये अयं विचारः न कृतः अपितु तत्तद् ग्रहस्य प्रकृत्यादिवशात् साक्षात् फलानि निर्णीयन्ते। तद्यथा –

मूलपाठः –

"रविस्तु शोकसन्तापाविन्दुः क्षेमं धरासुतः।
अपमृत्युं बुधो बुद्धिं जीवो लाभं कविः शुभम्॥

शनिः शत्रुभयं कष्टं राहुः केतुश्च शोकताम्।
वितनोति नरादीनामित्याहुः पूर्वसूरयः॥"

पदच्छेदः – रविः, तु, शोक-सन्तापौ, इन्दुः, क्षेमं, धरासुतः, अपमृत्युं, बुधो, बुद्धिं, जीवो, लाभं, कविः, शुभम्, शनिः शत्रु-भयं, कष्टं, राहुः, केतुः, च, शोकताम्, वितनोति, नरादीनाम्, इति आहुः, पूर्व-सूरयः।

अन्वयः – नरादीनां रविः तु शोकसन्तापौ (वितनोति), इन्दुः क्षेमम्, धरासुतः अपमृत्युं, बुधः बुद्धिं, जीवः लाभं, कविः शुभं, शनिः शत्रुभयं, राहुः कष्टं, केतुः च शोकताम् (वितनोति) इति पूर्वसूरयः आहुः।

प्रतिपदार्थः – नरादीनाम् = पृच्छकादीनां मानवानाम्, रविः = सूर्यग्रहः, तु शोकसन्तापौ = शोकं सन्तापञ्च दुःखम् इत्यर्थः, वितनोति = विस्तारयति ददाति वा। इन्दुः = चन्द्रग्रहः, क्षेमम् = कल्याणम्, धरासुतः = कुजः (धरायाः = पृथिव्याः सुतः-पुत्रः धरासुतः), अपमृत्युम् = अकालमृत्युम्, बुधः = बुधग्रहः, बुद्धिम् = सद्बुद्धिम्, जीवः = गुरुः, लाभम्, कविः = शुक्रग्रहः, शुभम् = शुभकरं फलम्, शनिः = शनिग्रहः, शत्रुभयम् = शत्रुणा उत्पादितं भयम्, राहुः = राहुग्रहः, कष्टम् = क्लेशं दुःखं वा, केतुः = केतुग्रहः, शोकताम् = शोकस्य अधिकताम्, वितनोति इति पूर्वसूरयः = प्राचीनाः आचार्याः, आहुः = कथितवन्तः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावार्थः –

"स्वां स्वां दशामुपगता स्वफलप्रदा स्युः"।

इति बृहज्जातकग्रन्थस्य प्रसिद्धा उक्तिः। एतदनुसारं ग्रहाः स्वफलं स्वीयदशायामेव विशेषतः प्रयच्छन्ति इति सिद्धं भवति। तत्फलं कीदृशं भवति इति विषये सुमहान् विचारः क्रियते होराशास्त्रे। फलितज्योतिषग्रन्थेषु ग्रहाणां बलादिवशात् दशाफलस्य निर्णयः क्रियते। प्रश्नग्रन्थेषु दशाविचारे तत्रापि दैनिकग्रहदशाविचारे ग्रहाणां तत्प्रकृत्यनुसारम् उत्कृष्टः विचारः कृतः वर्तते। प्रश्नभूषणग्रन्थे आचार्यः जीवनाथझावर्यः प्रत्येकं ग्रहस्य दशायां पृच्छकेन कीदृशं फलम् अनुभूयते इति विचारं प्रतिपादयति। तत्र राहु-केतुसहितं सप्तग्रहाणाम् अपि पृथक् फलं प्रतिपादितम् आचार्यैः। तद्यथा –

(१) सूर्यग्रहस्य दशायां शोकस्य सन्तापस्य च अभिवर्धनं भवति।

(२) चन्द्रः सौम्यग्रहरूपेण प्रसिद्धः स्वदशायां कल्याणकारी भवति।

(३) कुजः अग्निकारकः क्रूरश्च अतः स्वदशायां शस्त्रादिभिः आघातेन दुर्घटनादिभिः च अकालमृत्युकारकः भवति। अतः कुजग्रहस्य दैनिकदशायाम् अपमृत्युसदृशं फलम् अनुभूयते।

(४) बुधग्रहः विद्या-वाणी-बुद्धि-इत्यादिविषयाणां कारकग्रहः। अतः स्वदशायां सद्बुद्धिं ददाति, सद्बुद्धिजनितेषु विद्यादिकार्येषु च साफल्यं प्रददाति।

(५) गुरुः लाभभावस्य कारकः। स्वदशायामपि शुभकार्येषु लाभप्रदायकः भवति अयं ग्रहः।

(६) शुक्रः सौम्यग्रहः शुभकारकश्च। एतस्य दैनिकदशायां भौतिकसुखादिनिमित्तं क्रियमाणानि कार्याणि शुभानि भवन्ति। कार्याणां फलमपि शुभकरं भवति।

(७) शनिग्रहः स्वस्य दैनिकदशायां शत्रुपक्षतः भीतिं जनयति।

(८) राहुग्रहस्य दशायां शारीरिकक्लेशः उत्पद्यते। अर्थात् यद्दिने राहोः दैनिकदशा भवति तद्दिने शरीरे क्लेशः उत्पद्यते।

(९) केतुः स्वीयदशायां शोकं जनयति। यद्दिने केतोः दशा भवति तद्दिने अवश्यं शोककरी वार्ता श्रूयते अथवा केनचित् कारणेन शोकः उत्पद्यते।

एवं प्रकारेण सर्वेषां नवग्रहाणां दैनिकदशायाः फलनिर्णयः कर्तव्यः।

ग्रहाणां दैनिकदशाफलस्य स्पष्टावगमनार्थं दैनिकदशाफलचक्रम् अत्र प्रस्तूयते।

1	2	3	4	5	6	7	8	9	तिथि+वार+नक्षत्र+योग+करणम् - योगफलम् - 9 = शेषः, शेषसंख्या एव ग्रहसंख्या
सूर्यः	चन्द्रः	कुजः	बुधः	गुरुः	शुक्रः	शनिः	राहुः	केतुः	दिनदशायाः स्वामिनः ग्रहाः
शोकः, सन्तापः	उत्सवः, शुभवार्ता	अकालमृत्युः, शस्त्रेण भयम्	मद्बुद्धिः	बहुविधः लाभः	शुभम्	शत्रुभयम्	कष्टम्	शोकः	दिनदशायाः फलम्

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बोधप्रश्नाः

६. विष्कम्भादीनां योगानां संख्या का?

७. कति स्थिरकरणानि?

८. ग्रहाणां दशानयनार्थं केषां संख्या योजनीया?

९. गणनाक्रमे एकः अवशिष्यते चेत् कस्य ग्रहस्य दशा निर्णेतव्या?

१०. दिनदशायां सूर्यग्रहस्य दशाफलं किम्?

११. दिनदशायां शत्रुभयं कः ग्रहः वितनोति?

१२. केतुग्रहस्य दशाफलं किम्?

मूलपाठः

लग्नगो दिनचर्यायां सप्तमस्थोऽपि चन्द्रमा।
कुरुते शोभनं सर्वं विपरीतमतोऽन्यथा॥१॥

क्रूरो राहुः कुजो वाऽपि निजक्षेत्रेऽष्टमे भवेत्।
चन्द्रोऽपि यदि तत्रस्थः कुरुते शस्त्रजं भयम्॥२॥

तिथ्यर्क्षवारयोगानां संख्या करणसंयुता।
नवाप्ता प्रश्नकालेऽर्कादियं दिनदशा नृणाम्॥३॥

रविस्तु शोकसन्तापाविन्दुः क्षेमं धरासुतः।
अपमृत्युं बुधो बुद्धिं जीवो लाभं कविः शुभम्॥४॥

शनिः शत्रुभयं कष्टं राहुः केतुश्च शोकताम्।
वितनोति नरादीनामित्याहुः पूर्वसूरयः॥५॥

१४.७ सारांशः

प्रियच्छात्र! अस्मिन् पाठे भवान् मानवस्य दिनचर्या कथं भविष्यति इति निर्णयार्थं विविधान् योगान् पठितवान्। तेषां योगानां सूक्ष्मरूपेण परिशीलनेन पृच्छकस्य अद्यतनं दिनं कथं भविष्यति इति निर्णयः स्पष्टतया कर्तुं शक्यते। प्रथमतः अद्यतनं दिनं शुभं भवति अथवा अशुभम् इति निर्णयार्थं चन्द्रग्रहस्य प्रामुख्यमुच्यते। चन्द्रः यदि प्रश्नलग्नगतः अथवा सप्तमस्थाने स्थितः भवति तदा तद्दिनं पूर्णतः शुभं लाभकरं च भवति। तद्विपरीतं दिनचर्याविषयकप्रश्ने यदि चन्द्रः २-३-४-५-६-१०-१२ स्थानेषु स्थितः भवति तदा दिनचर्या कष्टकरी भवति। तद्दिने पृच्छकेन महान् क्लेशः सोढव्यः भवति।

अस्माकं दिनचर्या न सर्वदा सुखकरी अथवा आनन्दकरी भवति। कदाचित् महत् दुःखमपि दिवसे अनुभूयते कदाचिच्च भीतिः अपि। शस्त्रादीनाम् आघातेन जायमाना भीतिः अद्यतनदिवसे भवति न वा इत्यस्य अभिज्ञानार्थम् कश्चन योगः प्रतिपादितः प्रश्नभूषणे। पापग्रहः राहुः भौमो वा यदि स्वीयराशौ स्थित्वा अष्टमभावे चन्द्रेण सह तिष्ठति तदा तद्दिने शस्त्रप्रहारादिभिः भयं जायते, इति निर्णयः कर्तव्यः।

तदनन्तरं सूर्यादीनां नवग्रहाणां दैनिकी शुभाशुभदशा विचार्यते। येन स्पष्टतया तद्दिने पृच्छकेन प्राप्यमाणं फलं निर्णेतुं शक्यते। ग्रहाणां दशाक्रमनिर्धारणार्थं पञ्चाङ्गज्ञानं परमावश्यकं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवति। पञ्चाङ्गे तिथि-नक्षत्र-वार-योग-करणानि अन्तर्भवन्ति। तिथयः प्रतिपदादयः अमान्तं यावत् सुप्रसिद्धाः। नक्षत्राणि अश्विन्यादीनि सप्तविंशतिः सन्ति। वाराः रवि-सोमादयः सप्तसंख्याकाः, योगाः विष्कम्भादयः सप्तविंशति एव प्रसिद्धाः, करणानि चर-स्थिरभेदाभ्याम् आहृत्य एकादशसंख्यकानि।

ग्रहाणां दशानिर्णयार्थं प्रश्नकालस्य तिथ्यादीनि पञ्चाङ्गानि ज्ञातव्यानि। प्रश्नसमये यत्संख्यकाः तिथ्यादयः भवन्ति, सा संख्या एकत्रीकरणीया। सम्प्राप्तानां संख्यानां योगं कृत्वा नवसंख्यया विभाजनं कर्तव्यम्। शेषसंख्यया सूर्यादिग्रहाणां दशा प्रकल्पनीया। तद्यथा - अवशिष्टसंख्या एकः (१) चेत् तद्दिने सूर्यस्य दशा निर्णेतव्या, द्वयम् अवशिष्यते चेत् चन्द्रग्रहस्य दशा भवति, एवं क्रमेण ३ = भौमस्य, ४ = बुधस्य, ५ = गुरोः, ६ = शुक्रस्य, ७ = शनेः, ८ = राहोः, ९ = केतुग्रहस्य च दशा भवति। एवम्प्रकारेण ग्रहाणां दशाक्रमं विज्ञाय तत्तद् ग्रहस्य दशावशात् तद्दिनस्य फलं वक्तव्यम्।

फलनिर्देशः अपि सुस्पष्टतया प्रतिपादितः वर्तते पाठेऽस्मिन्। रविः स्वीयदशायां शोकं सन्तापं च कुरुते। चन्द्रः स्वदशाकाले कल्याणकरः भवति। कुजः अकालमृत्युकरः भवति। बुधस्य दशायां सद्बुद्धिजनितकार्याणि क्रियन्ते। गुरोः दैनिकी दशा लाभकरी भवति। शुक्रस्य दिनदशायां सर्वं शुभमेव भवति। शनेः दैनिकदशायां शत्रुभिः जनिता भीतिः चिन्ता च जायते। राहुः स्वीयदशायां क्लेशमेव उत्पादयति - अर्थात् तद्दिने पृच्छकस्य महत्कष्टं जायते। केतुग्रहः शोककारकः अतः तस्य दिनदशायां शोकस्य अधिकता भवति इति निर्णयः कर्तव्यः। एवम्प्रकारेण अस्मिन् पाठे संक्षेपरूपेण स्पष्टतया च दिनचर्याप्रश्नानां निर्णयार्थं विविधाः योगाः, दैनिकदशाक्रमः, ग्रहाणां दशाफलानि च वर्णितानि सन्ति।

१४.८ शब्दावली

१.	निजक्षेत्रे	-	स्वराशौ।
२.	ऋक्षम्	-	नक्षत्रम्।
३.	आप्ता	-	भक्ता।
४.	क्षेमम्	-	कल्याणम्।
५.	धरासुतः	-	भौमः।
६.	अपमृत्युः	-	अकालमरणम्।
७.	कविः	-	शुक्रग्रहः।
८.	वितनोति	-	विस्तारयति प्रददाति वा।
९.	पूर्वसूरयः	-	प्राचीनाः आचार्याः।

१४.९ सन्दर्भग्रन्थः

१. ''प्रश्नभूषणम्'' - दैवज्ञजीवनाथझाप्रणीतम्, 'प्रेक्षा' 'सौम्या' संस्कृत-हिन्दीव्याख्योपेतम्, व्याख्याकारः = आचार्यः गुरुप्रसादगौडः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, २००७।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१४.१० सहायकग्रन्थाः

१. **प्रश्नवैष्णवः**, 'भावप्रकाशिका' – हिन्दी-टीकोपेतः, सम्पादकः – पं. उमाकान्तझा, नागप्रकाशनम्, दिल्ली, १९९७।

२. **प्रश्नमार्गः**, हिन्दीव्याख्याकारः – आचार्यः गुरुप्रसादगौडः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, २००७।

३. **ताजिकनीलकण्ठी** – आचार्यनीलकण्ठविरचिता, हिन्दीव्याख्याकारः = पं. सीतारामझा, चौखम्बा विद्याभवनम्, वाराणसी, २००७।

४. **बृहज्जातकम्**, दैवज्ञवराहमिहिररचितम्, सम्पादकः – सत्येन्द्रमिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, २०१४।

१४.११ बोधप्रश्नोत्तराणि

१. शुभकरम्।

२. २-३-४-५-६-८-९-१०-११-१२।

३. मेषे वृश्चिके वा।

४. चन्द्र-राहु-कुजाः।

५. अष्टमस्थाने स्थितः इत्यर्थः।

६. सप्तविंशतिः।

७. चत्वारि।

८. तिथि-नक्षत्र-वार-योग-करणानाम्।

९. सूर्यस्य।

१०. शोक-सन्तापकरम्।

११. शनिः।

१२. शोकस्य अभिवर्धनम्।

१४.१२ अभ्यासप्रश्नाः

१. दैनिकशुभाशुभफलयोगान् प्रतिपादयत।

२. दिनचर्यायां शस्त्रजन्यान् भययोगान् वर्णयत।

३. नवग्रहाणां दैनिकदशायाः निर्धारणस्य क्रमं स्पष्टयत।

४. नवग्रहाणां दैनिकदशायाः फलं प्रतिपादयत।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पञ्चदशः पाठः – क्रय-विक्रयप्रश्नविचारः

पाठसंरचना

१५.१ प्रस्तावना
१५.२ उद्देश्यम्
१५.३ क्रय-विक्रयप्रश्नविचारः
१५.३.१ क्रय-विक्रयप्रश्ने विचारणीयाः भावाः
१५.४ क्रयेण लाभ-हानियोगाः
१५.४.१ विक्रयेण लाभ-हानियोगाः
१५.४.२ क्रय-विक्रयप्रश्ने लाभ-हानिविषये मतान्तराणि
बोधप्रश्नाः
१५.५ वस्तूनां न्यूनाधिकमूल्यविचारः
१५.५.१ मूल्यविषयकः अपरः योगः
१५.५.२ न्यूनाधिकमूल्यस्य कालपरिमाणविचारः
बोधप्रश्नाः
१५.६ क्रय-विक्रयप्रश्ने लग्नबलविचारः
१५.७ धान्यानाम् अधिपतिविचारः
बोधप्रश्नाः
मूलपाठः
१५.८ सारांशः
१५.९ शब्दावली
१५.१० सन्दर्भग्रन्थः
१५.११ सहायकग्रन्थाः
१५.१२ बोधप्रश्नोत्तराणि
१५.१३ अभ्यासप्रश्नाः

१५.१ प्रस्तावना

प्रश्नभूषणस्य पञ्चदशे पाठे भवतः स्वागतम्। पूर्वस्मिन् पाठे भवान् दिनचर्याविषयक-प्रश्नविचारे दैनिकं शुभाशुभफलम्, शस्त्रजनितभययोगम्, नवग्रहाणां दिनदशाम्, ग्रहाणां दैनिकदशायाः फलविचारं च सम्यक् पठितवान् एव। सम्प्रति पञ्चदशेऽस्मिन् ''क्रय-विक्रयप्रश्नविचारः'' नामके पाठे क्रय-विक्रयादिषु लाभप्रदयोगान् हानिजनकयोगान् च पठिष्यति।

भौतिके युगेऽस्मिन् धनमाश्रित्य एव प्रधानतया मानवानाम् जीवनं प्रचलति, अत एव ''सर्वे गुणाः काञ्चनमाश्रयन्ति' इत्युक्तिः अपि प्रसिद्धा जाता। धनार्जनस्य विविधाः उपायाः भवन्ति, वाणिज्यं च तत्र विशिष्टः उपायः। वाणिज्यप्रसङ्गे विपण्यां कदाचित् वस्तूनां मूल्यं वर्धते कदाचिच्च न्यूनं भवति। मूल्यानां वर्धनं ह्रासश्च कदा सम्भवति इति सामान्यतः कोऽपि ज्ञातुं न शक्नोति। किन्तु अस्माकं पूर्वजाः महर्षयः स्वीयतपोबलेन ग्रहाणां सर्वविधवस्तुषु प्रभावं विलोक्य तद्योगान् विविधेषु ग्रन्थेषु प्रतिपादितवन्तः। येन न केवलं सामान्यजनानाम् उपकारः भवति अपितु व्यवसायिनः अपि समुचिते काले वस्तूनां क्रयं विक्रयं च कृत्वा लाभान्विताः भवन्ति। अतः क्रय-विक्रयसम्बद्धम् उत्तमं ग्रहचारं ज्ञातुं जनाः दैवज्ञं पृच्छन्ति। क्रय-विक्रयविषयकप्रश्ने के भावाः विचारणीयाः? कस्मिन् शुभयोगे कृतं क्रयणं-विक्रयणं वा लाभं जनयति? कदा वस्तूनां मूल्यम् अधिकं भवति कदा च न्यूनम्? विविधवस्तूनां धान्यानां च अधिपतयः ग्रहाः के? इत्यादीन् सर्वान् विचारान् विस्तारपूर्वकं भवान् अस्मिन् पाठे पठिष्यति येन क्रय-विक्रयप्रश्नानां समुचितं समाधानं कर्तुं शक्ष्यति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१५.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान्–

- वस्तूनां क्रयेण लाभः भविष्यति उत हानिः इति निर्णेतुं शक्ष्यति।
- वस्तूनां विक्रयेण हानि-लाभयोः निर्णयं कर्तुं शक्ष्यति।
- वस्तूनां मूल्येषु न्यूनाधिकतां प्रतिपादयितुं समर्थो भविष्यति।
- धान्यानाम् अधिपतीन् विज्ञाय तेषां फलानि प्रतिपादयितुं शक्ष्यति।

१५.३ क्रय-विक्रयप्रश्नविचारः

अस्याम् एकविंशतिशताब्द्यां वाणिज्यक्षेत्रे महति प्रतिस्पर्धा दृश्यते। प्रतिदिनं विशिष्टवस्तूनां मूल्यं वर्धते कदाचित् च न्यूनं भवति। अतः न्यूनमूल्येन स्वीकृतवस्तुनः अधिकमूल्येन विक्रयणं कृत्वा लाभः अत्यधिकः भवति, कदाचित् च अधिकमूल्येन क्रीतस्य वस्तुनः कालान्तरे मूल्येषु न्यूनतायां जातायाम् अल्पमूल्येन अपि विक्रयणम् आपतति येन महति हानिः जायते वणिजाम्। अतः कस्मिन् काले क्रयणं लाभप्रदं भवति इति निर्णयार्थं वणिजः दैवज्ञस्य समीपम् आगत्य प्रश्नान् पृच्छन्ति। तन्निर्णयार्थं च दैवज्ञः क्रय-विक्रययोः निमित्तं शुभकालनिर्धारणार्थं विविधान् अंशान् विचारयति। विशेषतः कस्मिन् काले क्रयणं लाभप्रदम्? कदा वस्तूनां मूल्यं वर्धते कदा हि अल्पं भवति? केषां ग्रहाणां केषु वस्तुषु प्रभावः भवति? इत्यादीन् सर्वान् अंशान् विचार्य दैवज्ञः क्रय-विक्रयविषयकप्रश्नस्य फलनिर्णये समर्थो भवति।

१५.३.१ क्रय-विक्रयप्रश्ने विचारणीयाः भावाः

क्रय-विक्रयविषयकः प्रश्नः यदा दैवज्ञस्य पुरतः क्रियते तदा कस्मात् भावात् के विषयाः विचारणीयाः इत्यस्य निर्णयार्थं प्रश्नभूषणकारः आचार्यः जीवनाथझावर्यः एवं प्रतिपादयति–

मूलपाठः –

प्रश्नलग्नपतिः क्रेता विक्रेता लाभपो ग्रहः।

पदच्छेदः – प्रश्न-लग्नपतिः, क्रेता, विक्रेता, लाभपः, ग्रहः।

अन्वयः – प्रश्नलग्नपतिः क्रेता (भवति), लाभपो ग्रहः विक्रेता (भवति)।

प्रतिपदार्थः – प्रश्नलग्नपतिः = प्रश्नलग्नस्य स्वामी ग्रहः, क्रेता = क्रयणकर्ता भवति, लाभपः = एकादशभावस्य स्वामी, ग्रहः विक्रेता = विक्रयणकर्ता भवति।

भावार्थः – अत्र हि प्रश्नलग्नस्य यः अधिपतिग्रहः भवति तद्वशात् क्रेतुः विचारः कर्तव्यः अर्थात् तस्य ग्रहस्य प्रकृतोः बलाबलवशात् च क्रेतुः स्थितिः, मानसिकता, इत्यादयः अंशाः ज्ञातुं शक्यन्ते। एकादशभावस्य स्वामी योः ग्रहः तद्वशात् विक्रेतुः विचारः कर्तव्यः। अर्थात् विक्रेता सज्जनः वा, विश्वासयोग्यः वा इत्यादयः अंशाः एकादशभावस्य स्वामिवशात् विचारणीयाः इति।

१५.४ क्रयेण लाभ-हानियोगाः

कस्मिन् काले कृतं क्रयणं लाभाय भवति इति विषयके प्रश्ने फलनिर्णयार्थं दैवज्ञेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

के अंशाः विचारणीयाः इत्येतदर्थं प्रश्नभूषणग्रन्थे स्पष्टतया प्रतिपादितम् अस्ति। तद्यथा –

मूलपाठः –

''क्रयाद्यदि भवेल्लाभो गृह्णामीदमहन्तदा।
इति प्रश्ने शुभं लग्नं प्रष्टुर्लाभः क्रयाणकात्॥''

पदच्छेदः – क्रयाद्, यदि, भवेत्, लाभः, गृह्णामि, इदम्, अहम्, तदा, इति, प्रश्ने, शुभं, लग्नं, प्रष्टुः, लाभः, क्रयाणकात्।

अन्वयः – यदि क्रयाद् लाभः भवेत् तदा इदम् अहं गृह्णामि-इति प्रश्ने (यदि) लग्नं शुभं (तदा) क्रयाणकात् प्रष्टुः लाभः (भवेत्)।

प्रतिपदार्थः – यदि क्रयात् = वस्तुनः क्रयणात् (धनदानपूर्वकं संग्रहणात्), लाभः = धनलाभः, भवेत् = स्यात्, तदा इदम् = चिन्त्यमानं वस्तु, अहम् = प्रष्टा, गृह्णामि = क्रीणामि स्वीकरोमि वा, इति प्रश्ने यदि लग्नम् = प्रश्नलग्नम्, शुभम् = सौम्यग्रहयुतम्, शुभग्रहदृष्टम्, तदा क्रयाणकात् = वस्तूनां क्रयणात्, प्रष्टुः = पृच्छकस्य लाभः भवेत्।

भावार्थः – कश्चित् पृच्छकः यदा दैवज्ञसमीपं समागत्य वस्तूनां क्रयणेन लाभः भविष्यति न वा? इति प्रश्नं पृच्छति तदा क्रयणेन लाभादिनिर्णयार्थं केचन अंशाः ज्ञातव्याः भवन्ति। ये आचार्यजीवनाथझावर्यैः अस्मिन् ग्रन्थे प्रतिपादिताः। आचार्याणां मतानुसारं क्रयेण लाभविषयकप्रश्ने लाभ-हानि-इत्यादयः विषयाः प्रश्नलग्नस्य शुभाशुभस्थितिवशादेव विचारणीयाः। प्रश्नलग्नं यदि शुभग्रहयुतं शुभग्रहस्थराशियुतम् अथवा शुभवर्गादिभिः संयुतं भवति तदा प्राश्निकः क्रीतवस्तुभिः लाभं प्राप्नोति इति निर्णयः कर्तव्यः। अन्यथा तद्विपरीतं भवति। अर्थात् वस्तूनां क्रयविषयकप्रश्ने प्रश्नलग्नं क्रूरग्रहप्रभावितम्, अशुभवर्गादिभिः संयुतम्, पापग्रहैः वीक्षितं च भवति तदा क्रयेण लाभः न स्यादिति वाच्यम्।

१५.४.१ विक्रयेण लाभहानियोगाः

वस्तूनां विक्रयेण लाभः भविष्यति न वा इति प्रश्ने फलनिर्णयक्रमः प्रोक्तः जीवनाथझावर्यैः। तद्यथा –

मूलपाठः –

''विक्रीणामीति सम्प्रश्ने लाभस्थानं विचारयेत्॥
शुभस्वामियुते लाभे विक्रयाल्लाभमादिशेत्।
लाभेशे शुभवर्गाढ्ये मित्रक्षेत्रादिगेऽपि च॥''

पदच्छेदः – विक्रीणामि, इति, सम्प्रश्ने, लाभ-स्थानं, विचारयेत्, शुभ-स्वामि-युते, लाभे, विक्रयात्, लाभम्, आदिशेत्, लाभेशे, शुभ-वर्गाढ्ये, मित्र-क्षेत्रादिगे, अपि, वा।

अन्वयः – विक्रीणामि इति सम्प्रश्ने लाभस्थानं विचारयेत्, लाभे शुभस्वामियुते विक्रयात् लाभम् आदिशेत्, अपि च लाभेशे शुभवर्गाढ्ये मित्रक्षेत्रादिगे (लाभमादिशेत्)।

प्रतिपदार्थः – विक्रीणामि = विक्रयणं करोमि, इति सम्प्रश्ने = प्रश्ने कृते सति, लाभस्थानं = एकादशभावं, विचारयेत् = विचारणां कुर्यात्। लाभे = एकादशभावे शुभस्वामियुते = शुभराशे स्वामिना संयुते, विक्रयात् = वस्तूनां विक्रयणात्, लाभम्, आदिशेत् = कथयेत्, अपि च लाभेशे = एकादशभावस्य अधिपतौ, शुभवर्गाढ्ये = शुभेषु नवमांशादि षडवर्गेषु प्राप्ते, मित्रक्षेत्रादिगे = मित्रग्रहाणां स्थाने गते सति लाभमादिशेत् इति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावार्थः – वस्तूनां विक्रयात् अर्थात् धनं स्वीकृत्य वस्तुदानात् तद्वाणिज्यात् वा लाभः भवति न वा इति प्रश्नः यदा केनचित् पृच्छकेन क्रियते तदा फलनिर्णयार्थं सर्वोऽपि निर्णयः लाभस्थानात् अर्थात् एकादशभावात् एव करणीयः इति आचार्याणां जीवनाथझावर्याणाम् आशयः। एकादशभावः यदि शुभग्रहस्य राशिसंयुतः भवति अर्थात् एकादशभावे कर्क-वृष-मिथुन-कर्क-कन्या-तुला-धनु-मीनराशिषु अन्यतमः राशिः स्यात्, तस्य स्वामी अपि यदि तत्रैव स्थितः भवति तदा विक्रयात् अवश्यं लाभः भवति इति निर्णयः वक्तव्यः। एकादशभावे शुभग्रहाः भवन्ति चेदपि विक्रयात् लाभः एव वक्तव्यः।

विक्रयात् लाभविषयकः अपरः विशिष्टयोगः उच्यते। यदि एकादशभावस्य स्वामी शुभग्रहाणां षड्वर्गे गतः भवति तदापि विक्रयात् लाभः भवति। षड्वर्गास्तु इत्थं प्रोक्ताः आचार्यवराहमिहिरेण –

''द्रेक्काण-होरा-नवभाग-संज्ञा त्रिंशाशकद्वादशसंज्ञिताश्च।
क्षेत्रं च यद्यस्य स तस्य वर्गो होरेति लग्नं भवनस्य चार्धम्॥''

एवं लग्न-होरा-द्रेष्काण-नवांश-त्रिंशाश-द्वादशांशाः षड्वर्गाः कथिताः सन्ति। एकादशभावस्य अधिपतिः यदि (गुरु-शुक्र-बुधादीनां) शुभग्रहाणां षड्वर्गे गतः भवति तदा अवश्यमेव वस्तूनां विक्रयात् लाभः भवति इति कथनीयम्।

१५.४.२क्रय-विक्रयप्रश्ने लाभहानिविषये मतान्तराणि

वस्तूनां क्रयेण विक्रयेण वा लाभ भवति उत हानिः इति प्रश्नं यदा कश्चित् पृच्छकः करोति तदा दैवज्ञः फलनिर्णयं कथं कुर्यात् इति विषये प्रश्नवैष्णवे एवं प्रतिपादितम्-

''लग्नेशे द्यूने भवेद् वस्तुनोऽर्थो
विक्रेता क्रेता विलग्ने स्मरेशे॥''

अर्थात् प्रश्नलग्नस्य स्वामी सप्तमभावे विद्यते तदा विक्रयणेन महान् लाभः भवति। यदि सप्तमभावस्य स्वामी प्रश्नलग्ने स्थितः भवति तदा क्रयेण महान् लाभः भवति। एवम्प्रकारेण क्रय-विक्रययोः प्रश्नसन्दर्भे लाभालाभयोः ज्ञानार्थं द्वौ अंशौ स्पष्टतया ज्ञातव्यौ। तद्यथा -

१. लग्नेशः सप्तभावे स्थितः चेत् विक्रयेण लाभः भवति।

२. सप्तमस्थानस्य अधिपतिः लग्ने स्थितः चेत् क्रयेण लाभः भवति।

क्रय-विक्रयप्रश्ने लाभालाभयोः विषये ताजिकनीलकण्ठी ग्रन्थे प्रतिपादितः योगः प्रश्नभूषणग्रन्थे उक्तयोगवत् वर्तते। तद्यथा -

''बलशालि विलग्नं चेद् गृह्यते तत्क्रयाणकम्।
''आयस्थाने बलवति विक्रेतव्यं क्रयाणकम्॥'' इति।

एतदनुसारं लग्नं यदि बलपूर्णं चेत् वस्तूनां क्रयेण लाभः भवति। एकादशभावः बलिष्ठः चेत् विक्रयेण लाभः स्यात् इति निर्णयः कर्तव्यः।

बोधप्रश्नाः

१. धनार्जनस्य विशिष्टः उपायः कः?

२. क्रेतुः विचारः कस्मात् भावात् कर्तव्यः?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. विक्रेतारूपेण कः ग्रहः कल्पितः?

४. ''लाभपः'' इति पदस्य अर्थः कः?

५. क्रयात् लाभः भवेत् न वा इति प्रश्ने लाभः कस्मात् निर्णेतव्यः?

६. लाभेशः यदि शुभवर्गाढ्ये स्थितः तर्हि किं फलं भवति?

७. प्रश्नलग्नस्वामिनः सप्तमभावे स्थितिवशात् किं फलं भवति?

१५.५ वस्तूनां न्यूनाधिकमूल्यविचारः

जीवनोपयोगीनां सामान्यवस्तूनां मूल्येषु प्रतिदिनं वृद्धिः ह्रासो वा जायमानः दृश्यते। यस्मात् न केवलं सामान्यजनाः प्रभाविताः भवन्ति अपितु वाणिज्यकर्तृणाम् उपरि अपि महान् प्रभावः जायते। विशेषतः क्रय-विक्रयादिभिः वाणिज्यं कुर्वतां जनानां कृते मूल्येषु न्यूनाधिकतायाः पूर्वज्ञानं परमावश्यकं प्रतीयते। अतः ते दैवज्ञस्य समीपम् आगत्य केषां वस्तूनां मूल्येषु कदा वृद्धिः कदा च ह्रासः जायते इति निर्णयार्थं प्रश्नं पृच्छन्ति। तन्निर्णयार्थम् आचार्यजीवनाथझावर्याः एवं प्रत्यपादयन् –

मूलपाठः –

समर्घं वा महर्घं स्यादिति प्रश्ने विशेषतः।
लग्नस्य सौम्यतां ज्ञात्वा फलं कुर्याद्विचक्षणः॥

पदच्छेदः – समर्घम्, वा, महर्घम्, स्याद्, इति, प्रश्ने, विशेषतः, लग्नस्य, सौम्यतां, ज्ञात्वा, फलम्, कुर्यात्, विचक्षणः।

अन्वयः – (पदार्थानां) समर्घं वा महर्घं स्यादिति प्रश्ने विशेषतः लग्नस्य सौम्यतां ज्ञात्वा विचक्षणः फलं कुर्यात्।

प्रतिपदार्थः – पदार्थानाम् अथवा वस्तूनां समर्घम् = न्यूनमूल्यम्, वा = अथवा, महर्घम् = अधिकमूल्यम्, स्याद् = भवेत्, इति प्रश्ने = पृच्छकस्य जिज्ञासायाम्, विशेषतः = विशेषरूपेण, लग्नस्य = प्रश्नलग्नस्य, सौम्यताम् = शुभत्वम् (शुभग्रह-राश्यादियुतिम्), ज्ञात्वा = अवगत्य, विचक्षणः = विद्वान् (ज्योतिश्शास्त्रज्ञाता अथवा ज्योतिर्विद्यानिपुणः), फलम् = निष्कर्षम्, कुर्यात् = (फलं निद्रिशेत् इत्यर्थः)।

भावार्थः – वाणिज्यकर्तृणाम् अयं विशेषः यत् ते विपण्यां वस्तूनां मूल्यं दृष्ट्वा एव स्वीयवस्तूनां क्रयणं विक्रयणं च कुर्वन्ति। कदा मूल्यं न्यूनं कदा च अधिकं भवति इति तु स्फुटतया वक्तुं न शक्यते। अतः दैवज्ञसमीपम् आगत्य ते मूल्यविषयकं प्रश्नं पृच्छन्ति। दैवज्ञः प्रश्नलग्नद्वारा विविधान् अंशान् विलोक्य मूल्यस्य अभिवृद्धिं ह्रासं च निर्णेतुं समर्थः भवति। मूल्यनिर्णयविषये आचार्यः जीवनाथझावर्यः प्रश्नलग्नस्य वैशिष्ट्यं प्रतिपादयति। तद्यथा –

प्रश्नलग्नं यदि शुभमस्ति तर्हि वस्तूनां मूल्यं न्यूनं भवति। अर्थात् प्रश्नलग्नं शुभराशेः भवति, लग्ने शुभग्रहाः विद्यमानाः भवन्ति, तत्र च शुभग्रहाणां दृष्टिः भवति, तदा एतादृशावस्थायां प्रश्नलग्नस्य शुभत्वं निर्णेतुं शक्यते। प्रश्नलग्नं यदि पापग्रहराशौ भवति, लग्ने पापग्रहाणां युतिः भवति अथवा प्रश्नलग्ने पापग्रहाणां दृष्टियोगः सम्भवति तर्हि वस्तूनां मूल्येषु अधिकता भवति इति निर्णयः कर्तव्यः। अतः प्रश्नलग्नस्य शुभत्वम् अशुभत्वं च अवलोक्य एव दैवज्ञः मूल्यस्य न्यूनाधिकविचारे पृच्छकानां कृते परामर्शं दद्यात्, फलनिर्देशं च कुर्यात्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१५.५.१ मूल्यविषयकः अपरः योगः

प्रश्नलग्नस्य शुभाशुभत्वे वस्तूनां मूल्येषु न्यूनाधिकतायाः विषये पूर्वं प्रतिपादितमेव। सम्प्रति अस्मिन् विषये एव अपरः योगः विचार्यते। यत्र महर्घतायाः अर्थात् मूल्येषु अधिकतायाः, समर्घतायाः अर्थात् मूल्येषु अल्पतायाः विषये सूक्ष्मरूपेण विचारं कृत्वा मूल्यनिर्णयः क्रियते। तदुक्तं जीवनाथझावर्येण –

मूलपाठः –

''लाभलाभाशंपौ प्रश्ने सबलौ चेन्महर्घता।
तावेव बलहीनौ चेत्समर्घं जायते तदा॥''

पदच्छेदः – लाभ-लाभांशपौ, प्रश्ने, सबलौ, चेत्, महर्घता, तौ, एव, बल-हीनौ, चेत्, समर्घम्, जायते, तदा।

अन्वयः – प्रश्ने लाभ-लाभांशपौ सबलौ चेत्तदा महर्घता जायते। एवं तौ बलहीनौ चेत् समर्घम् (जायते)।

प्रतिपदार्थः – प्रश्ने = प्रश्नलग्ने, लाभलाभांशपौ = लाभपः-एकादशभावस्य स्वामी, लाभांशपः = तन्नवमांशेशः, एतौ द्वौ, सबलौ = बलपूर्णौ चेत्, तदा = तस्याम् अवस्थायाम्, महर्घता = मूल्यवृद्धिः, जायते। एवं प्रकारेण तौ = एकादशेशः तन्नवांशेशः च, बलहीनौ = निर्बलौ, भवतः चेत् समर्घम् = मूल्येषु अल्पता, जायते इति।

भावार्थः – मूल्येषु न्यूनतायाः अधिकतायाश्च विचारः यथा प्रश्नलग्नात् क्रियते तथैव एकादशभावस्य स्वामिवशात्, तस्य नवांशेशवशात् चापि कर्तुं शक्यते इति स्पष्टतया अत्र प्रतिपाद्यते। मूल्येषु न्यूनाधिकतायाः प्रश्नसमये यदि एकादशभावस्य स्वामीग्रहः बलयुक्तः भवति तदा वस्तूनां मूल्येषु अभिवृद्धिः सञ्जायते। तथैव एकादशभावस्य स्वामी यस्मिन् नवांशे स्थितः भवति तन्नवांशस्वामी अपि यदि बलयुक्तः भवति तदा वस्तूनां मूल्यस्य अभिवृद्धिः एव जायते। अर्थात् वस्तूनि महर्घतां प्राप्नुवन्ति इत्यर्थः।

तद्विपरीतं यदि एकादशभावस्य स्वामी तन्नवमांशेशः च बलरहितौ भवन्तः तदा वस्तूनां मूल्येषु ह्रासः भवति। एवम्प्रकारेण एकादशभावस्वामिनः तन्नवमांशेशस्य च बलत्वं बलहीनत्वं च दृष्ट्वा एव वस्तूनां मूल्येषु अभिवर्धनं ह्रासश्च निर्णेतव्यः।

१५.५.२ न्यूनाधिकमूल्यस्य कालपरिमाणविचारः

विपण्यां वस्तूनां मूल्यं सदैव समानं न भवति, अद्य कस्यचित् धान्यविशेषस्य यद् मूल्यं तदेव मूल्यम् अग्रिमे मासे न भवति ततः न्यूनम् अधिकं वा अवश्यं भवेत्। एवं चेत् कियत्कालानन्तरं मूल्ये परिवर्तनं भवति, कति मासान् यावत् मूल्ये न्यूनता एव भवेत्, कति मासान् यावत् च मूल्ये अभिवृद्धिः एव तिष्ठेत् इत्यस्य अभिज्ञानार्थं, मूल्यानां कालपरिमाणं च निर्णेतुं ग्रहाणां स्थितिः अत्र विचार्यते। तद्यथा –

मूलपाठः –

''ग्रहोऽसौ यावतो मासान् विधत्तेऽङ्गस्य सौम्यताम्।
समर्घं तावतो मासानन्यथा व्यत्ययं वदेत्॥''

पदच्छेदः – ग्रहः, असौ, यावतः, मासान्, विधत्ते, अङ्गस्य, सौम्यताम्, समर्घम्, तावतः, मासान्, अन्यथा, व्यत्ययं वदेत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्वयः – असौ ग्रहः यावतः मासान् अङ्गस्य सौम्यतां विधत्ते, तावतः मासान् समर्घं वदेत् अन्यथा व्यत्ययं (वदेत्)।

प्रतिपदार्थः – असौ = शुभत्वकारकः ग्रहः, यावतः = यावत् संख्यकान् मासान्, अङ्गस्य = प्रश्नलग्नस्य, सौम्यताम् = शुभत्वम्, विधत्ते = धारयति करोति वा, तावतः = तावत् संख्यकान्, मासान्, समर्घम् = मूल्येषु न्यूनताम्, वदेत् = कथयेत् निर्णयेत् वा, अन्यथा = एतद् विपरीतस्थितौ, व्यत्ययम् = फले वैपरीत्यम्, निर्णयेत्।

भावार्थः – वस्तूनां मूल्येषु न्यूनाधिकतायाः कालविचारे प्रश्नलग्नस्य बलमेव महत्त्वपूर्णं भवति। कति मासान् यावत् वस्तुनः मूल्यं सामान्यम् अल्पं वा तिष्ठति इति निर्णये लग्नभावे सौम्यग्रहाणां कालपरिमाणं चिन्तनीयं भवति। यावत्कालपर्यन्तं अथवा यावतः मासपर्यन्तं सौम्याः शुभग्रहाः लग्ने स्थित्वा लग्नस्य शुभत्वं रक्षयन्ति तावत्कालं यावत् अथवा तावतः मासान् यावत् वस्तूनां मूल्यम् अल्पमेव तिष्ठति।

एतद्-विपरीतस्थितौ सर्वं विपरीतमेव भवति। अर्थात् पापग्रहाः यावत्कालपर्यन्तं लग्ने तिष्ठन्ति तावत्कालपर्यन्तं वस्तूनां मूल्यं वर्धितमेव तिष्ठति। अतः प्रश्नलग्नस्य शुभाशुभकालं निर्णीय वस्तूनां मूल्ये ह्रासवृद्धेः कालं निर्णेतुं शक्नुमः इति।

बोधप्रश्नाः

८. समर्घस्य महर्घस्य च विचारः कस्मात् भावात् कर्तव्यः?

९. लाभांशपः यदि बली चेत् किं फलं भवति?

१०. समर्घं कदा जायते?

११. वस्तूनां मूल्ये अल्पता कियत्कालपर्यन्तं तिष्ठति?

१५.६ क्रय-विक्रयप्रश्ने लग्नबलविचारः

आधुनिके अस्मिन् काले जीवनोपयोगीनां प्रायः सर्वेषामपि वस्तूनां सम्प्रति क्रय-विक्रयद्वारा वाणिज्यं क्रियते एव। सर्वेषाम् अपि वस्तूनाम् एकस्मिन् एव काले मूल्यवर्धनं ह्रासः च न सम्भवति। अतः कस्मिन् काले कस्य वस्तुनः मूल्यवर्धनादिकं भवति तदर्थं तत्तद्वस्तूनाम् अधिपतयः निर्णीताः सन्ति। तेषाम् अधिपतीनां बलवशात् एव लग्नबलं विज्ञाय मूल्यनिर्णयः कर्तुं शक्यते। यतो हि क्रये विक्रये च लाभालाभयोः निर्णयार्थं प्रश्नलग्नस्य एव अत्यधिकं महत्त्वं विद्यते। अतः तस्य बलविचारः अपि विशेषतः कर्तव्यः एव। एतद्विषये प्रश्नभूषणग्रन्थे आचार्यः जीवनाथझावर्यः लग्नबलविचारं प्रतिपादयति। तद्यथा–

मूलपाठः –

''विबले लग्नपे प्रश्ने वस्तुस्वामिबलेन तु।
विज्ञेयमत्र लग्नस्य बलं तदनुसारतः॥
सबले प्रश्नलग्ने च समर्घं विबले न हि।''

पदच्छेदः – विबले, लग्नपे, प्रश्ने, वस्तु-स्वामि-बलेन, तु, विज्ञेयम्, अत्र, लग्नस्य, बलम्, तद्, अनुसारतः, सबले, प्रश्न-लग्ने, च, समर्घम्, विबले, न, हि।

अन्वयः – प्रश्ने लग्नपे विबले वस्तुस्वामिबलेन लग्नस्य बलं तदनुसारतः विज्ञेयम्। प्रश्नलग्ने सबले समर्घम्, विबले हि न॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपदार्थः – प्रश्ने = क्रय-विक्रयविषयके प्रश्ने, लग्नपे = लग्ननायके, विबले = बलरहिते, सति, वस्तुस्वामिबलेन = धान्यादीनां वस्तूनां स्वामिनः-अधिपतेः बलेन, लग्नस्य = प्रश्नलग्नस्य, बलम्, तदनुसारतः = वस्तूनां स्वामिनः बलानुसारतः, विज्ञेयम् = ज्ञातव्यम्। प्रश्नलग्ने = प्रश्नकुण्डल्यां तनुभावे, सबले = बलसहिते बलयुक्ते वा, हि = निश्चयेन, न = अल्पमूल्यत्वं न भवति अर्थात् अधिकमूल्यं भवति इत्यर्थः।

भावार्थः – क्रय-विक्रयप्रश्ने यदि प्रश्नलग्नस्य अधिपतिः बलहीनः भवति तदा सर्वेषामपि वस्तूनां मूल्येषु न्यूनता वक्तव्या अथवा केषाञ्चिद् एव वस्तूनाम्। तत्रापि लग्नस्य बलं कथं निर्णेयम् इत्यस्य समाधानार्थम् आचार्यः प्रतिपादयति यत् लग्नं यदि बलहीनं भवति तर्हि तत्तद्-वस्तूनां ये अधिपतयः तेषां बलेन एव लग्नबलं विज्ञाय क्रय-विक्रयप्रश्नेषु निर्णयः वक्तव्यः। प्रश्नलग्नं यदि बली भवति तर्हि वस्तूनां मूल्येषु अल्पता, निर्बलावस्थायां हि वस्तूनां मूल्येषु अभिवर्धनं भवति इति निर्णयः वक्तव्यः। केषां वस्तूनाम् अधिपतयः के? इति अग्रे प्रतिपाद्यते।

१५.७ धान्यानाम् अधिपतिविचारः

इतः पूर्वं लग्नं निर्बलं चेत् वस्तुनः स्वामिबलेन लग्नस्य बलं ज्ञेयम् इति ज्ञातमेव। विविधानां वस्तूनां कारकाः स्वामिग्रहाः के इति प्रतिपादनं सम्प्रति क्रियते। तत्र विशेषतः जीवनोपयोगीनां वस्तूनां धान्यानां च अधिपतिविचारः क्रियते। तत्रापि प्रथमतः धान्यानाम् अधिपतिविचारः ततश्च अन्यान्य-वस्तूनाम् अपि अधिपतयः निरुप्यन्ते। कस्य धान्यस्य कः अधिपतिः इति ज्ञानार्थं प्रश्नभूषणग्रन्थे एवं प्रतिपाद्यते –

मूलपाठः –

''माषकोद्रवकङ्गूनां लवणस्य तिलस्य च।
द्रव्याणां कृष्णवर्णानामधिपः रविजो भवेत्॥
यवगोधूमधान्यानां सर्षपस्य च देवता।
स्वर्णेक्षुपीतधान्यानां गुरुरेव भवेदिह॥''

पदच्छेदः – माष-कोद्रव-कङ्गूनाम्, लवणस्य, तिलस्य, च, द्रव्याणाम्, कृष्ण-वर्णानाम्, अधिपः, रविजः, भवेत्, यव-गोधूम-धान्यानाम्, सर्षपस्य, च, देवता, स्वर्ण-इक्षु-पीत-धान्यानाम्, गुरुः, एव, भवेद्, इह।

अन्वयः – माष-कोद्रव-कङ्गूनां लवणस्य तिलस्य कृष्णवर्णानां द्रव्याणां च अधिपः रविजः भवेत्। यवगोधूमधान्यानां स्वर्णेक्षुपीतधान्यानां सर्षपस्य च देवता इह गुरुरेव भवेत्।

प्रतिपदार्थः – माष-कोद्रव-कङ्गूनाम् = माषः, कोद्रवः, कङ्गूः इत्येते सर्वे धान्यविशेषाः, एतेषां धान्यानाम्, लवणस्य, तिलस्य = तैलयुक्तधान्यविशेषस्य, कृष्णवर्णानां द्रव्याणां = कृष्णवर्णयुक्तानां वस्तूनाम्, च अधिपः = स्वामी, रविजः = शनिः (रविणा-सूर्येण, जातः = उत्पन्नः, रविजः) भवेत्।

यव-गोधूमधान्यानाम् = यवः गोधूमः च प्रसिद्धधान्ये, तेषां, स्वर्ण-इक्षु-पीतधान्यानाम् = सुवर्ण विशिष्टधातुः, इक्षु = मधुररसयुक्तः सस्यविशेषः (यस्य रसेन शर्करा निर्मीयते), पीत-पीतवर्णस्य धान्यानि यथा चणकदलम्, इत्थं एतेषां सर्षपस्य = सर्षपनामकस्य धान्यस्य च देवता = स्वामी इह गुरुः = बृहस्पतिः एव भवेत्।

विविधानां धान्यानां स्वामिनः पूर्वं प्रतिपादिताः सम्प्रति विविधवस्तूनां अधिपतिविचारः विविधग्रहाणाम् आधिपत्यं च अत्र प्रस्तूयते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मूलपाठः –

''भृगुः स्यात्सर्वसस्यानां द्विदलानां बुधो भवेत्।
गन्धादीनां रसानां च स्नेहानामधिपो रविः॥

सर्वस्य कोषधान्यस्य प्रवालस्य च मङ्गलः।
रसानामधिपश्चन्द्रः सस्यानामधिपो गुरुः॥

आधाता भार्गवो नूनं विधाता सकलस्य च।''

पदच्छेदः – भृगुः, स्यात्, सर्व-सस्यानाम्, द्वि-दलानाम्, बुधो, भवेत्, गन्धादीनाम्, रसानाम्, च, स्नेहानाम्, अधिपो, रविः, सर्वस्य, कोष-धान्यस्य, प्रवालस्य, च, मङ्गलः, रसानाम्, अधिपः, चन्द्रः, सस्यानाम्, अधिपः, गुरुः, आधाता, भार्गवो, नूनम्, विधाता, सकलस्य, च।

अन्वयः – भृगुः सर्वसस्यानाम् अधिपः भवेत्, बुधः द्विदलानाम् (अधिपः भवेत्), रविः गन्धादीनां रसानां स्नेहानां च (अधिपः भवेत्)। मङ्गलः सर्वस्य कोषधान्यस्य प्रवालस्य च अधिपः (भवेत्)। चन्द्रः रसानाम् (अधिपः भवेत्)। गुरुः सस्यानाम् अधिपः (भवेत्), भार्गवः सकलस्य आधाता-विधाता च नूनं (ज्ञेयः)।

प्रतिपदार्थः – भृगुः = शुक्रः, सर्वसस्यानाम् = सर्वेषां सस्यानां-सस्यविशेषाणाम्, अधिपः = स्वामी, भवेत्। बुधः = बुधग्रहः, द्विदलानाम् = मुद्ग-चणकादि द्विधा विभक्तानां द्विदलधान्यानाम्, अधिपः भवेत्। रविः = सूर्यः, गन्धादीनाम् = गन्धयुक्तपदार्थानाम्, रसानाम् = मधुर-अम्ल-लवणादिषड्रसानाम् अथवा रसयुक्तपदार्थानाम्, स्नेहानाम् = विविधप्रकारकाणां तैलानाम्, च अधिपः भवेत्, मङ्गलग्रहः सर्वस्य अपि कोषस्य, धान्यस्य = गोधूमादिधान्यस्य, प्रवालस्य = 'मूंगा' नामधेयरत्नस्य च अधिपः भवेत्। चन्द्रग्रहः रसानाम् = षड्रसानाम्, अधिपः भवेत्। गुरुः सस्यानाम् = सर्वप्रकारकाणां विशिष्टसस्यानाम्, स्वामी भवेत्। भार्गवः = शुक्रग्रहः, सकलस्य = सम्पूर्णस्य, आधाता = उत्पत्तिकर्ता, विधाता = पोषणकर्ता च नूनं = निश्चयेन ज्ञेयः।

भावार्थः – पूर्वोक्ते श्लोकचतुष्टये विशिष्ट-वस्तूनां धान्यानां च अधिपतयः प्रोक्ताः सन्ति। विशेषतः सर्वेषां ग्रहाणाम् आधिपत्यं निरूप्यते।

सूर्यग्रहः विशेषरूपेण गन्धयुक्तपदार्थानाम्, रसयुक्तपदार्थानां, तैलानां च स्वामी अस्ति। चन्द्रग्रहः विविधानां रसानां तत्पदार्थानां च स्वामी भवति। कुजः कोषाणाम्, धान्यानाम्, प्रवालरत्नस्य च स्वामी भवति। खाद्यरूपेण प्रयुज्यमानानि सर्वाणि द्विदलानि माषदलम्, मुद्गदलम्, चणकदलमित्यादिकम् प्रसिद्धम्, तेषां स्वामी बुधः। बृहस्पतिः यव-गोधूम-सर्षप-पीतवर्णधान्य-इक्षुरसस्य-सुवर्णधातूनां च स्वामी अस्ति। शुक्रग्रहः सर्वप्रकारकाणाम्, सस्यानां स्वामी, सर्वेषां वस्तूनाम् उत्पत्तिकर्ता पोषणकर्ता च भवति। शनिः विशेषरूपेण माष-कोद्रव-कङ्गू-लवण-तिल-कृष्णवर्णीयवस्तूनां च स्वामी अस्ति।

बोधप्रश्नाः

१२. यदि लग्नेशः निर्बलः भवति तदा लग्नबलं केन ज्ञातव्यम् ?

१३. प्रश्नलग्नं यदि निर्बलं तर्हि किं फलं भवति?

१४. लवणस्य तिलस्य च अधिपतिः कः भवति?

१५. कोषाणां, धान्यानां, प्रवालस्य च स्वामी कः भवति?

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१६. सर्वेषां वस्तूनाम् उत्पत्तिकर्ता पोषणकर्ता च कः ग्रहः भवति?

मूलपाठः

प्रश्नलग्नपतिः क्रेता विक्रेता लाभपो ग्रहः।
क्रयाद्यदि भवेल्लाभो गृह्णामीदमहन्तदा।
इति प्रश्ने शुभं लग्नं प्रष्टुर्लाभः क्रयाणकात्॥
विक्रीणामीति सम्प्रश्ने लाभस्थानं विचारयेत्॥

शुभस्वामियुते लाभे विक्रयाल्लाभमादिशेत्।
लाभेशे शुभवर्गाढ्ये मित्रक्षेत्रादिगेऽपि च॥

समर्घं वा महर्घं स्यादिति प्रश्ने विशेषतः।
लग्नस्य सौम्यतां ज्ञात्वा फलं कुर्याद्विचक्षणः॥

लाभलाभाशंपौ प्रश्ने सबलौ चेन्महर्घता।
तावेवं बलहीनौ चेत्समर्घं जायते तदा॥

ग्रहोऽसौ यावतो मासान् विधत्तेऽङ्गस्य सौम्यताम्।
समर्घं तावतो मासानन्यथा व्यत्ययं वदेत्॥

विबले लग्नपे प्रश्ने वस्तुस्वामिबलेन तु।
विज्ञेयमत्र लग्नस्य बलं तदनुसारतः॥

सबले प्रश्नलग्ने च समर्घं विबले न हि।
माषकोद्रवकङ्गूनां लवणस्य तिलस्य च।
द्रव्याणां कृष्णवर्णानामधिपः रविजो भवेत्॥

यवगोधूमधान्यानां सर्षपस्य च देवता।
स्वर्णेक्षुपीतधान्यानां गुरुरेव भवेदिह॥

भृगुः स्यात्सर्वसस्यानां द्विदलानां बुधो भवेत्।
गन्धादीनां रसानां च स्नेहानामधिपो रविः॥

सर्वस्य कोषधान्यस्य प्रवालस्य च मङ्गलः।
रसानामधिपश्चन्द्रः सस्यानामधिपो गुरुः॥

आधाता भार्गवो नूनं विधाता सकलस्य च।

१५.८ सारांशः

वस्तूनां क्रय-विक्रयसन्दर्भे मूल्येषु अभिवृद्धिः ह्रासः च महत्वपूर्णः अंशः। अतः वणिजः वस्तूनां वाणिज्येन लाभप्राप्त्यर्थं दैवज्ञं क्रय-विक्रयविषये बहुविधान् प्रश्नान् पृच्छन्ति, तेषां प्रश्नानां फलनिर्णयार्थं विविधाः योगाः विचाराश्च अस्मिन् पाठे वर्णिताः सन्ति। क्रय-विक्रयविषयकप्रश्ने प्रश्नलग्नपतिवशात् क्रेतुः स्वभावः स्थितिः च ज्ञातव्या, एकादशभावस्य स्वामिवशात् विक्रेतुः स्थितिः अवगन्तव्या। क्रयेण विक्रयेण च लाभालाभादि-विषये प्रश्नलग्नस्य एकादशभावस्य च महत्त्वं भवति। यदि प्रश्नलग्ने शुभग्रहाणां स्थितिः, शुभग्रहाणां दृष्टिः युतिः च सम्भवति तदा वस्तूनां क्रयेण लाभः निर्णेतव्यः। यदि प्रश्नलग्नात् एकादशभावे शुभग्रहाणां स्थितिः, युतिः दृष्टिः च भवति तथैव एकादशभावस्य स्वामी शुभग्रहाणां षड्वर्गे स्थितः भवति तदा विक्रयेण लाभः भविष्यति इति वक्तव्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नवैष्णवग्रन्थे एतद्विषये एकं मतम् उपलभ्यते। तद्यथा प्रश्नलग्नस्य स्वामी सप्तमभावे स्थितः चेत् विक्रयेण महान् लाभः भवति। यदि च सप्तमभावस्य स्वामी प्रश्नलग्ने भवति तदा क्रयेण लाभः भवति इति निर्णयः कर्तव्यः। व्यापारयोग्यवस्तुनः मूल्यं न्यूनं भवति वा अधिकम् इति जिज्ञासा वाणिज्यिकानां स्वाभाविकी एव। मूल्यनिर्णये तु प्रश्नलग्नस्य शुभत्वम् एव विशेषतः द्रष्टव्यं भवति। प्रश्नलग्ने शुभराशेः स्थितिः, शुभग्रहाणां युतिः दृष्टिश्च भवति चेत् मूल्यं न्यूनमेव भवति पापग्रहाणां दृष्ट्या युत्या स्थित्या च मूल्यवर्धनम् वक्तव्यम्। सूक्ष्मरूपेण निर्णयः एकादशभावस्य स्वामिवशात् करणीयः। प्रश्नकाले एकादशभावस्य स्वामी तन्नवमांशेशः च बलपूर्णौ चेत् वस्तूनां मूल्यं वर्धितं भवति। तौ बलहीनौ तदा धान्यादिवस्तूनि अल्पमूल्यतां प्राप्नुवन्ति।

कियत्कालं यावत् वस्तूनां मूल्यं न्यूनम् अथवा अधिकं तिष्ठेत् इत्यस्य निर्णयः तु प्रश्नलग्नस्य शुभाशुभत्वं विलोक्य एव कर्तव्यः। लग्नस्य शुभत्वविधायकाः ग्रहाः यावतः मासान् अथवा यावत्कालं पर्यन्तं लग्नस्य शुभतां कुर्वन्ति तावतः मासान् यावत् वस्तूनां मूल्यम् अल्पमेव तिष्ठति। तद्विपरीतस्थितौ अर्थात् पापग्रहाः यावत्कालपर्यन्तं लग्ने प्रभावं स्थापयन्ति तावत्कालं यावत् मूल्ये वृद्धिः एव भवति।

क्रय-विक्रयप्रश्ने लग्नबलस्य अत्यधिकं महत्वं भवति। यदि लग्नस्य स्वामी निर्बलः भवेत् तर्हि लग्नबलं कथं निर्णेतव्यम् इति प्रश्नस्य समाधानार्थं विविधवस्तूनाम् अधिपतयः ज्ञातव्याः। ततश्च तेषां वस्तूनां स्वामिनः बलवशात् लग्नबलं ज्ञातव्यम् इति। अतः तदर्थं वस्तूनां स्वामिनः प्रोच्यन्ते। माष-कोद्रव-कङ्गू-लवण-तिल-कृष्णवर्णीयवस्तूनां स्वामी शनिः भवति। यव-गोधूम-सर्षप-सुवर्ण-इक्षुरसस्य-पीतधान्यानां स्वामी गुरुः भवति। सर्वेषां सस्यानां सर्वेषां च वस्तूनां उत्पत्तिकर्ता पोषणकर्ता च शुक्रः प्रसिद्धः। बुधग्रहः द्विदलानां स्वामी उच्यते, रविः गन्धयुक्तपदार्थानाम्, षड्रसानाम्, तैलानां च अधिपतिः भवति। सम्पूर्णकोषधान्य-प्रवालानाम् अधिपतिः भौमः भवति। चन्द्रः सर्वेषां रसयुक्तपदार्थानाम् अधिपतिः भवति।

एवं प्रकारेण प्रत्येकं वस्तुनः अधिपतेः बलवशात् तत् तद्वस्तुनः मूल्यविचारः करणीयः। तथा च विविधानां योगानां सम्यक् चिन्तनं कृत्वा क्रय-विक्रयादिप्रश्नेषु मूल्यनिर्णयादिकं कर्तव्यम्। यच्च अस्मिन् पाठे विस्तरेण निरूपितम्।

१५.९ शब्दावली

१.	क्रेता	-	क्रयणकर्ता (यः धनं दत्वा वस्तु गृह्णाति)।
२.	विक्रेता	-	विक्रयणकर्ता (यः धनं स्वीकृत्य अन्येभ्यः वस्तु ददाति)।
३.	लाभपः	-	एकादश भावस्य स्वामी।
४.	समर्घम्	-	अल्पमूल्यम्।
५.	महर्घम्	-	अधिकं मूल्यम्।
६.	सौम्यताम्	-	शुभताम्।
७.	विचक्षणः	-	विद्वान् (ज्योतिश्शास्त्रज्ञाता)।
८.	अङ्गस्य	-	लग्नभावस्य।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

९.	व्यत्ययम्	-	वैपरीत्यम्।
१०.	विबले	-	बलरहिते।
११.	कोद्रवः	-	कोद्रवनामकः धान्यविशेषः (हिन्दीभाषायां = कोदा)।
१२.	रविजः	-	शनिः।
१३.	इक्षुः	-	सस्यविशेषः, यस्य रसेन शर्करा गुडं च निर्मीयते।
१४.	स्नेहानाम्	-	तैलानाम्।
१५.	प्रवालस्य	-	रत्नविशेषस्य (हिन्दीभाषायां = मूंगा)।
१६.	नूनं	-	निश्चयेन।

१५.१० सन्दर्भग्रन्थः

१. **प्रश्नभूषणम्** - दैवज्ञजीवनाथझाप्रणीतम्, 'प्रेक्षा' 'सौम्या' संस्कृत-हिन्दी-व्याख्योपेतम्, व्याख्याकारः = आचार्यः गुरुप्रसादगौडः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, २००७।

१५.११ सहायकग्रन्थाः

१. **प्रश्नवैष्णवः**, 'भावप्रकाशिका' - हिन्दीटीकोपेतः, सम्पादकः - पं. उमाकान्तझा, नागप्रकाशनम्, दिल्ली, १९९७।

२. **प्रश्नमार्गः**, हिन्दीव्याख्याकारः - आचार्यः गुरुप्रसादगौडः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, २००७।

३. **ताजिकनीलकण्ठी** - आचार्यनीलकण्ठविरचिता, हिन्दीव्याख्याकारः = पं. सीतारामझा, चौखम्बा विद्याभवनम्, वाराणसी, २००७।

४. **बृहज्जातकम्**, दैवज्ञवराहमिहिररचितम्, सम्पादकः - सत्येन्द्रमिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, २०१४।

१५.१२ बोधप्रश्नोत्तराणि

१. वाणिज्यम्।

२. लग्नपतिवशात्।

३. लाभभावस्य स्वामिग्रहः।

४. एकादशभावस्य स्वामी।

५. लग्नस्य शुभत्ववशात्।

६. विक्रयात् लाभः भवति।

७. विक्रयात् लाभः भवति।

८. लग्नतः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

९. महर्घता।

१०. लाभ-लाभांशपौ यदा बलहीनौ भवतः तदा समर्घं जायते।

११. शुभग्रहाः यावत्कालपर्यन्तं लग्नस्य शुभत्वं रक्षन्ति।

१२. वस्तुस्वामिबलेन।

१३. प्रश्नलग्नं यदि निर्बलं तर्हि महर्घं जायते।

१४. रविजः।

१५. कुजः।

१६. शुक्रः।

१५.१३ अभ्यासप्रश्नाः

१. क्रय-विक्रयप्रश्ने विचारणीयान् भावान् वर्णयत।

२. विक्रयेण लाभहानियोगान् प्रतिपादयत।

३. वस्तूनां मूल्यपरिवर्तने कालनिर्धारणं स्पष्टयत।

४. क्रय-विक्रयप्रश्ने लग्नबलनिर्णयं प्रतिपादयत।

५. रवि-गुरु-शुक्रग्रहाः केषां वस्तूनाम् अधिपतयः इति सप्रमाणं विशदयत।

—•—

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षोडशः पाठः – द्रेष्काणवशात् विविधयोगविचारः

पाठसंरचना

१६.१ प्रस्तावना
१६.२ उद्देश्यम्
१६.३ द्रेष्काणविचारः
बोधप्रश्नाः
१६.४ द्रेष्काणवशात् रोगिणः मरणयोगः
१६.४.१ रोगिणः अपरः मरणयोगः
१६.४.२ रोगिणः मरणाभावयोगः
बोधप्रश्नाः
१६.५ द्रेष्काणवशात् लाभयोगः
१६.६ क्रय-विक्रयप्रश्ने लग्नबलविचारः
बोधप्रश्नाः
१६.७ द्रेष्काणवशात् सर्वेषां भावानां फलविचारः
१६.८ फलादेशार्थं दैवज्ञस्य कर्तव्यम्
१६.९ ग्रन्थोपसंहारः
बोधप्रश्नाः
मूलपाठः
१६.१० सारांशः
१६.११ शब्दावली
१६.१२ सन्दर्भग्रन्थः
१६.१३ सहायकग्रन्थाः
१६.१४ बोधप्रश्नोत्तराणि
१६.१५ अभ्यासप्रश्नाः

१६.१ प्रस्तावना

प्रियच्छात्र! प्रश्नभूषणग्रन्थस्य षोडशे पाठे भवतः स्वागतम्। इतः पूर्वं पञ्चदशे पाठे भवान् क्रय-विक्रयप्रश्नानां फलनिर्णयार्थं विविधान् विचारान् पठितवान्। सम्प्रति अस्मिन् पाठे द्रेष्काणवशात् जायमानान् विविधयोगान् पठिष्यति तद्वशात् च फलनिर्णये समर्थः भविष्यति। अस्मिन् पाठे द्रेष्काणविचारः कथं क्रियते, केन प्रकारेण च द्रेष्काणानां गणना कर्तव्या इत्यादयः अंशाः तृतीये पाठ्यांशे उल्लिखिताः सन्ति। चतुर्थे पाठ्यांशे द्रेष्काणवशात् रोगिणः मरणयोगाः निरूपिताः सन्ति। ततः द्रेष्काणवशात् लाभयोगाः, पुत्रलाभयोगाः, समेषां भावानां च फलविचाराः क्रमशः उल्लिखिताः वर्तन्ते। अन्ते फलादेशार्थं दैवज्ञस्य कर्तव्यम्, ग्रन्थस्य उपसंहारः च निरूपितः अस्ति। एते सर्वे योगाः विषयाः च भवता पूर्वतन पाठेषु अपि प्रसङ्गवशात् पठिताः स्युः, परन्तु मरणादियोगानां सूक्ष्मतया फलनिर्देशार्थं द्रेष्काणवशात् जातानां योगानाम् अत्यधिकं महत्त्वं सिद्ध्यति। अत एव न केवलं प्रश्नशास्त्रे अपितु फलितशास्त्रे अपि वराहमिहिरादिभिः आचार्यैः द्रेष्काणविचारार्थं पृथक्रूपेण पाठाः निरूपिताः सन्ति। द्रेष्काणवशात् क्रियमाणः फलादेशः गभीरः भवति, स्फुटतया अनुभवयोग्यः अपि भवति इति प्रश्नभूषणग्रन्थस्य टीकाकारस्य आचार्यगुरुप्रसादगौडवर्यस्य आशयः। अतः मरणयोगादीनां विविधप्रश्नानां समाधानार्थं जीवनाथझावर्यैः प्रतिपादिताः द्रेष्काणवशात् विविधाः विचाराः अस्मिन् पाठे विस्तरेण निरूप्यन्ते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१६.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान्–

- द्रेष्काणानाम् अधिपतीन् निर्णेतुं शक्ष्यति।
- रोगिणः मृत्योः निर्णयं कर्तुं समर्थो भविष्यति।
- पृच्छकस्य पुत्रप्राप्तिः भविष्यति न वा इति प्रतिपादयितुं शक्ष्यति।
- द्रेष्काणवशात् सर्वेषां भावानां फलानि निरूपयितुं शक्ष्यति।
- दैवज्ञानां कर्तव्यं विज्ञाय अन्यान् बोधयितुं क्षमः भविष्यति।

१६.३ द्रेष्काण-विचारः

फलितज्योतिश्शास्त्रे जातकफलनिरूपणे प्रश्नफलनिरूपणे च बहूनि विधानानि सन्ति। तेषु सूक्ष्मतया फलनिर्णयार्थं षड्वर्गाणाम् अत्यधिकं महत्त्वं वर्तते। षड्वर्गाः तु क्रमेण एते वर्तन्ते– १. लग्नम् २. होरा ३. द्रेष्काणः ४. नवांशः ५. त्रिंशांशः ६. द्वादशांशः च। एतेषु वर्गेषु प्रत्येकम् अपि वर्गस्य स्वीयं वैशिष्ट्यं विद्यत एव। यथा–

वृत्तिविचारकाले नवांशस्य, कन्यायाः स्वभावे त्रिंशांशस्य इत्यादिक्रमेण सर्वेषां वर्गाणां महत्त्वं भवति। तथैव विविधानां प्रश्नानां फलनिर्णयार्थं द्रेष्काणस्य अपि महत्त्वं भवति। यच्च अग्रे प्रतिपाद्यते।

तत्रादौ को नाम द्रेष्काणः? कथं हि तस्य गणनाक्रमः वर्तते इति प्रश्नानां समाधानार्थम् उच्यते –

''राशेः त्रिभागः द्रेष्काणः स्यात्''। अर्थात् एकस्मिन् राशौ त्रिंशद् अंशाः भवन्ति। तेषां त्रिंशदंशानां त्रिधा विभागः एव द्रेष्काणः उच्यते। यथा– $\frac{30^\circ}{3}=10^\circ$

अतः एकस्मिन् राशौ १०°-१०° अंशानां भागत्रयेण त्रयः द्रेष्काणाः सम्भवन्ति। यथा–

१° ततः १०° पर्यन्तं प्रथमः द्रेष्काणः, ११° तः २०° पर्यन्तं द्वितीयः द्रेष्काणः, २१° तः ३०° पर्यन्तं द्रेष्काणः भवति।

द्रेष्काणानां गणना स्वस्थानात्, स्वपञ्चमस्थानात्, नवमस्थानात् च करणीया भवति। यथा मेषराशेः प्रथमः द्रेष्काणः मेषराशेः एव। अतः प्रथमः द्रेष्काणाधिपतिः भौमः भविष्यति। द्वितीयः द्रेष्काणः मेषात् पञ्चमराशेः सिंहस्य भवति अतः द्वितीयः द्रेष्काणेशः सूर्यः भविष्यति, मेषराशेः तृतीयद्रेष्काणः मेषात् नवमस्य धनुराशेः भवति। अतः तृतीयः द्रेष्काणेशः गुरुः भविष्यति। अनेन एव प्रकारेण वृष-मिथुनादिषु राशिषु अपि द्रेष्काणगणना कर्तव्या। द्रेष्काणान् सम्यक् विज्ञाय रोगादिविविधाः विषयाः सूक्ष्मतया आलोच्य निर्णेतुं शक्यन्ते।

बोधप्रश्नाः

१. प्रश्नभूषणग्रन्थस्य अयं कतमः पाठः?

२. अन्येन केन आचार्येण द्रेष्काणविचारार्थं पृथक् पाठाः निरूपिताः?

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. षड्वर्गाः के सन्ति?

४. वृत्तिविचारकाले कस्य वर्गस्य महत्त्वम् उच्यते?

५. को नाम द्रेष्काणः?

६. कति अंशानां एकः द्रेष्काणः भवति?

७. मेषराशेः प्रथमदेष्काणाधिपतिः कः ग्रहः?

१६.४ द्रेष्काणवशात् रोगिणः मरणयोगः

यदा कश्चिद् रोगी केनचिद् रोगेण अत्यन्तं पीडितः भवति तदा तस्य परिजनाः दैवज्ञं रोगविषये पृच्छन्ति यत् तस्य स्वास्थ्यलाभः भविष्यति न वा अथवा तेन रोगेण सह मरिष्यति इत्यादि। तस्मिन् प्रसङ्गे दैवज्ञः कथं निर्णयं कुर्यात् इत्येतदर्थं बहवः प्रकाराः निरूपिताः सन्ति ज्योतिश्शास्त्रे। तेषु प्रकारेषु अतिसूक्ष्मः प्रकारः वर्तते द्रेष्काणवशात् रोगिणः मरणविचारः। तद्यथा–

मूलपाठः –

''द्वाविंशतिदृकाणस्थः प्रश्नलग्नेश्वरो यदि।
तदा मृत्युं विजानीयादवश्यं रोगिणो बुधः॥''

पदच्छेदः – द्वाविंशति-दृकाणस्थः, प्रश्न-लग्न-ईश्वरः, यदि, तदा, मृत्युम्, विजानीयात्, अवश्यम्, रोगिणः, बुधः।

अन्वयः – प्रश्नलग्नेश्वरः यदि द्वाविंशतिदृकाणस्थः (स्यात्) तदा रोगिणः मृत्युः अवश्यं (भवति इति) बुधः विजानीयात्।

प्रतिपदार्थः – प्रश्नलग्नेश्वरः = प्रश्नलग्नस्य स्वामीग्रहः, यदि, द्वाविंशतिदृकाणस्थः = द्वाविंशतितमे (२२) द्रेष्काणे स्थितः स्यात्, तदा, रोगिणः = रोगेण पीडितस्य जनस्य, अवश्यम् = निश्चयेन, मृत्युम् = मरणं भवति इति बुधः=विद्वान् (ज्योतिषी इत्यर्थः), विजानीयात् = अवगच्छेत्।

भावार्थः – रोगिणः स्वास्थ्यलाभः भविष्यति न वा इति प्रश्नस्य समाधानार्थं कश्चनयोगः अत्र निरूप्यते। यदि प्रश्नलग्नस्य स्वामीग्रहः द्वाविंशतितमे द्रेष्काणे भवति तदा रोगिणः स्वास्थ्यलाभः न भवति अपितु निश्चयेन मृत्युः जायते इति निर्णयः कर्तव्यः। अत्र द्वाविंशतितमः द्रेष्काणः कथं भवति इति विचारणीयः अंशः। वस्तुतः एकस्मिन् राशौ त्रयः द्रेष्काणाः भवन्ति। अतः द्वादशराशिषु आहत्य षड्विंशतिः (36) द्रेष्काणाः भवन्ति। एवम्प्रकारेण लग्नात् गणनां कुर्मः चेत् द्वाविंशः द्रेष्काणः अष्टमभावस्य प्रथमः द्रेष्काणः भवति।

अष्टमभावः मृत्युकारकः उच्यते अतः अष्टमभावे प्रथमद्रेष्काणे यदि प्रश्नलग्नस्य स्वामी तिष्ठति तदा निश्चयेन मृत्युकारकः अयं योगः भवति।

१६.४.१ रोगिणः अपरः मरणयोगः

लग्नस्वामिनः द्रेष्काणे स्थितिवशात् मरणविषयकः योगः पूर्वम् उक्तः। सम्प्रति अष्टमस्थाने लग्नेशस्य अष्टमेशस्य च उभयोः अपि स्थितिवशात् अपरः मरणयोगः उच्यते। तद्यथा –

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मूलपाठः –

''तावेव निधने स्यातामेकद्रेष्काणगौ यदि।
तदा मृत्युर्भवेदेव रोगिणो नाऽत्र संशयः॥''

पदच्छेदः – तौ, एव, निधने, स्याताम्, एक-द्रेष्काणगौ, यदि, तदा, मृत्युः, भवेत्, एव, रोगिणः, न, अत्र, संशयः।

अन्वयः – तावेव यदि निधने एकद्रेष्काणगौ स्यातां तदा रोगिणः मृत्युः भवेदेव, अत्र न संशयः।

प्रतिपदार्थः – तौ = प्रश्नलग्नस्य स्वामी अष्टमभावस्य स्वामी च, एव, यदि, निधने = अष्टमभावे, एकद्रेष्काणगौ = एकम् एव द्रेष्काणं गतौ अथवा तत्र स्थितौ, स्याताम् = भवेताम्, तदा, रोगिणः = रोगेण ग्रस्तस्य जनस्य, मृत्युः = मरणम्, भवेदेव = निश्चयेन भवेत्, अत्र = अस्मिन् विषये न सन्देहः = संशयः न करणीयः इत्यर्थः।

भावार्थः – अस्मिन् पाठे मरणविषयकः अयं द्वितीयः योगः, यः द्रेष्काणवशात् सूक्ष्मतया चिन्त्यते। आयुषः विचारे सर्वदा लग्नेशस्य अष्टमेशस्य च प्राधान्यं भवति। तौ उभौ अपि लग्नेश-अष्टमेशौ अष्टमे स्थाने कुत्रापि एकस्मिन् एव द्रेष्काणे तिष्ठतः चेत् रोगिणः मरणम् अवश्यं भवति। अत्र संशयः न करणीयः एव इति।

१६.४.२ रोगिणः मरणाभावयोगः

द्रेष्काणवशात् विविधानां योगानां विचारप्रसङ्गे मरणयोगाः एतावत् पर्यन्तं प्रतिपादिताः। सम्प्रति कस्मिन् योगे रोगिणः स्वास्थ्यलाभः जायते इति प्रतिपाद्यते। आयुषः विचारणे अष्टमस्थानस्य यावत् महत्त्वं तावदेव लग्नभावस्य अपि। लग्ने स्थिताः ग्रहाः सुफलाः एव भवन्ति अष्टमादिषु स्थानेषु तु अनिष्टफलदाः भवन्ति। रोगिणः स्वास्थ्यलाभप्रश्ने लग्नभावस्य अपि अत्यधिकं महत्त्वं विद्यते। लग्नभावे लग्नेशस्य अष्टमेशस्य च स्थित्या स्वास्थ्यलाभः जायते। तद्यथा –

मूलपाठः –

''लग्नाष्टमपती लग्ने स्थितावेकत्र रोगिणाम्।
दृक्काणे मरणं न स्यादित्युक्तं पूर्वसूरिभिः॥''

पदच्छेदः – लग्न-अष्टम-पती, लग्ने, स्थितौ, एकत्र, रोगिणाम्, दृक्काणे, मरणम्, न, स्याद्, इति, उक्तम्, पूर्व-सूरिभिः।''

अन्वयः – लग्नाष्टमपती लग्ने एकत्र दृक्काणे स्थितौ (स्यातां तदा) रोगिणां मरणं न स्यात्, इति पूर्वसूरिभिः उक्तम्।

प्रतिपदार्थः – लग्नाष्टमपती = लग्नभावस्य अष्टमभावस्य च स्वामी, लग्ने = प्रश्नलग्ने, एकत्र = एकस्मिन् एव, दृक्काणे = द्रेष्काणे, स्थितौ = विद्यमानौ, स्याताम्, तदा रोगिणाम् = रोगग्रस्तजनानाम्, मरणम् = मृत्युः, न स्यात्, इति पूर्वसूरिभिः = पूर्वतनैः आचार्यैः, उक्तम् = कथितम्।

भावार्थः – लग्नेशस्य अष्टमेशस्य च अष्टमे भावे एकस्मिन्नेव द्रेष्काणे स्थितिवशात् निश्चयेन मरणं पूर्वस्मिन् योगे प्रतिपादितम्। अस्मिन् योगे तद्विपरीता स्थितिः उच्यते अर्थात् यदि लग्नेशः अष्टमेशः च उभौ अपि मिलित्वा लग्नभावे तिष्ठतः तत्रापि एकस्मिन्नेव द्रेष्काणे स्थितौ भवतः तदा मरणं न सम्भवति अपि तु स्वास्थ्यलाभः जायते।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतेन अवगम्यते यत् लग्नभावे पापग्रहाणां स्थितिः तेषां क्रूरग्रहाणाम् अनिष्टफलं नाशयति, शुभं च करोति।

बोधप्रश्नाः

८. प्रश्नलग्नाधिपतिः यदि द्वाविंशे द्रेष्काणे स्थितः तदा किं फलं भवेत्?

९. द्वादशराशिषु आहत्य कति द्रेष्काणाः भवन्ति?

१०. द्वाविंशः द्रेष्काणः कस्य भावस्य प्रथमः द्रेष्काणः उच्यते?

११. "निधने" इति पदस्य कोऽर्थः?

१२. लग्नेश-अष्टमेशयोः अष्टमे स्थाने एकस्मिन्नेव द्रेष्काणे स्थित्याः किं फलं?

१३. लग्नेश-अष्टमेशौ लग्ने एकस्मिन् द्रेष्काणे स्थितौ भवतः चेत् किं फलं भवति?

१६.५ द्रेष्काणवशात् लाभयोगः

पूर्वतनेषु पाठेषु बहवः लाभविषयकयोगाः प्रतिपादिताः सन्ति। यथा – नष्टद्रव्यलाभयोगः, क्रयेण लाभयोगः, विक्रयेण लाभयोगः इत्यादयः। लाभः अपि बहुविधः भवति यथा– द्रव्यलाभः, धनलाभः, पुत्रलाभः इत्यादयः। एतेषु विशेषतः क्रयेण, विक्रयेण, उद्योगेन, वृत्त्या, वाणिज्येन वा धनलाभः अत्र विशेषेण विचार्यते। लाभः यादृशः अपि भवेत् नाम, यदि उत्तमः ग्रहयोगः भवति तदा अवश्यं सर्वविधलाभः भवत्येव। अतः तादृशं लाभप्रदयोगं विशेषतः द्रेष्काणवशात् प्रतिपादयति आचार्यः जीवनाथझावर्यः।

मूलपाठः –

"लग्नलाभाधिपावेकदृकाणे लाभगौ यदि।
प्रश्नकर्तुस्तदा लाभो भविष्यति न संशयः॥"

पदच्छेदः – लग्न-लाभ-अधिपौ, एक-दृकाणे, लाभगौ, यदि, प्रश्नकर्तुः, तदा, लाभो, भविष्यति, न, संशयः।

अन्वयः – लग्नलाभाधिपौ लाभगौ यदि एकदृकाणे (भवतः) तदा प्रश्नकर्तुः लाभः भविष्यति (इति) संशयः न (अस्ति)।

प्रतिपदार्थः – लग्नलाभाधिपौ = प्रश्नलग्नस्य स्वामी, एकादशभावस्य च स्वामी, द्वौ अपि, लाभगौ = लाभस्थानं गतौ अर्थात् एकादशभावे स्थितौ, यदि एकदृकाणे = एकस्मिन् द्रेष्काणे, भवतः, तदा, प्रश्नकर्तुः = पृच्छकस्य, लाभः भविष्यति इति संशयः = सन्देहः न अस्ति एव।

भावार्थः – फलितज्योतिशशास्त्रे द्वादशभावाः प्रसिद्धाः। प्रत्येकम् अपि भावस्य काचित् विशिष्टा संज्ञा अस्ति एव, अतः तत्तद्-भाववशात् संज्ञायाः आधारेण फलनिर्णयः निर्देशश्च क्रियते। तेषु भावेषु एकादशभावस्य विशिष्टा संज्ञा वर्तते 'लाभः'। अतः यस्मिन् कस्मिन्नपि विषये लाभस्य विचारः एकादशभावात् एव क्रियते। एकादशभावस्य स्वामीग्रहः लाभेशनाम्ना सुप्रसिद्धः। एतस्य लाभभावस्य स्वामिनः लग्नेशेन सह युतिः लाभाय भवति। सा युतिः यदि लाभभावे भवति तत्रापि एकस्मिन् एव द्रेष्काणे भवति तर्हि विचारणीये विषये प्रश्नकर्तुः निश्चयेन लाभः भवति इति निर्णयः कर्तव्यः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवं प्रकारेण लग्नेशः एकादशेशः च एकादशभावे एकस्मिन्नेव द्रेष्काणे तिष्ठतः चेत् लाभः निश्चयेन भवति इति।

१६.६ द्रेष्काणवशात् पुत्रलाभयोगः

एतावत् पर्यन्तं यावन्तः योगाः प्रतिपादिताः सन्ति तेषु सर्वेषु अपि योगेषु प्रश्नलग्नस्य, प्रश्नलग्नस्वामिनः, द्रेष्काणस्य च महन्महत्त्वं प्रतिपादितम् अस्ति। यस्मात् भावात् यः विषयः विचार्यते तस्य भावस्य स्वामिनः लग्नेशस्य च सम्बन्धेन एव प्रायः तस्य भावस्य विषये उत्कृष्टः फलनिर्णयः क्रियते। यथा अष्टमभावस्वामिनः लग्नेशस्य च युत्या मृत्युविषये, लाभभावस्य स्वामिनः लग्नेशस्य च युत्या लाभविषये विचारः क्रियते तथैव लग्नेशस्य पञ्चभावस्वामिनः च सम्बन्धेन पुत्रविचारः क्रियते। तत्रापि सूक्ष्मतया निर्णयः द्रेष्काणवशात् भवति। एवम्प्रकारेण द्रेष्काणवशात् पुत्रलाभयोगः विशेषरूपेण प्रतिपादितः आचार्यजीवनाथझावर्यैः। तद्यथा –

मूलपाठः –

''एवं लग्नेशपुत्रेशावेकद्रेष्काणसंस्थितौ।
पञ्चमे पुत्रलाभः स्यादनायासेन पृच्छतः॥''

पदच्छेदः – एवम्, लग्नेश-पुत्रेशौ, एक-द्रेष्काण-संस्थितौ, पञ्चमे, पुत्र-लाभः, स्याद्, अनायासेन, पृच्छतः।

अन्वयः – एवं लग्नेश-पुत्रेशौ पञ्चमे एकद्रेष्काणसंस्थितौ (भवेताम्) तदा पृच्छतः अनायासेन पुत्रलाभः स्याद् (इति)।

प्रतिपदार्थः – एवम् = पूर्वोक्तप्रकारेण, लग्नेश-पुत्रेशौ = लग्नभावस्य स्वामी पञ्चमभावस्य स्वामी च, पञ्चमे = पञ्चमस्थाने, एक-द्रेष्काण-संस्थितौ = एकस्मिन् एव द्रेष्काणे विद्यमानौ स्याताम्, तदा, पृच्छतः = प्रश्नकर्तुः, अनायासेन = सुलभतया, पुत्रलाभः = पुत्रस्य प्राप्तिः, स्याद् इति।

भावार्थः – पुत्रप्राप्तियोगः स्फुटतया द्रेष्काणवशात् अत्र प्रतिपाद्यते। सन्तानकारकः भावः पञ्चमभावः भवति। अत एव तस्य 'सुतभावः' अपि अपरं नाम। तस्य पञ्चमभावस्य स्वामी ग्रहः एव पञ्चमेशः कथ्यते। यदि लग्नस्वामी पञ्चमभावस्य स्वामी च उभौ अपि ग्रहौ पञ्चमे पुत्रभावे एकस्मिन्नेव द्रेष्काणे स्थितौ भवतः तदा पृच्छकस्य अत्यन्तं सुलभतया पुत्रप्राप्तिः भवति इति निर्णयः करणीयः।

बोधप्रश्नाः

१४. ''लाभाधिपः'' इति पदस्य अर्थः कः?

१५. लग्नेशः लाभेशश्च यदि लाभस्थाने एकद्रेष्काणगतौ भवतः तदा किं फलं भवति?

१६. ''लाभः'' इति कस्य भावस्य विशिष्टा संज्ञा?

१७. लग्नेश-पुत्रेशौ पञ्चमे स्थाने एकद्रेष्काणस्थितौ भवतः चेत् किं फलं भवति?

१८. ''सुतभावः'' कस्य भावस्य अपरं नाम?

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१६.७ द्रेष्काणवशात् सर्वेषां भावानां फलविचारः

येन प्रकारेण पूर्वम् उक्तेषु योगेषु लग्नेशस्य भावाधीशस्य च एकस्मिन् एव द्रेष्काणे स्थितिवशात् तस्य भावस्य स्फुटतया फलनिर्णयः क्रियते स्म तथैव सर्वत्र अपि चिन्तनीयं भवेत्। द्रेष्काणवशात् फलचिन्तने प्रायः एकस्मिन् एव द्रेष्काणे प्रश्नलग्नेशस्य तत्तद्-भावाधीशस्य च युतिः अवलोक्यते। अनेन प्रकारेण चिन्तनस्य क्रमे प्रत्येकमपि भावात् विचारणीयविषयाणां फलादेशः कर्तुं शक्यते। तद्यथा –

मूलपाठः –

एवं सर्वेषु भावेषु दृकाणैरेव केवलैः।
तत्तद्भावफलं प्रष्टुर्वक्तव्यं गणकोत्तमैः॥

पदच्छेदः – एवम्, सर्वेषु, भावेषु, दृकाणैः, एव, केवलैः, तद्-तद्-भावफलम्, प्रष्टुः, वक्तव्यम्, गणक-उत्तमैः।

अन्वयः – एवं सर्वेषु भावेषु केवलैः दृकाणैः एव प्रष्टुः तत्तद्भावफलं गणकोत्तमैः वक्तव्यम्।

प्रतिपदार्थः – एवम् = अनेन प्रकारेण, सर्वेषु = सकलेषु, भावेषु = द्वादशभावेषु, केवलैः, दृक्काणैः = द्रेष्काणैः, एव, प्रष्टुः = प्रश्नकर्तुः, तत्तद्भावफलम्, तस्य-तस्य भावस्य फलम्, गणकोत्तमैः = ज्योतिषिकैः, वक्तव्यम् = कथनीयम् इति।

भावार्थः – पूर्वं प्रतिपादितेषु योगेषु यथा द्रेष्काणवशात् पञ्चमभावस्य, अष्टमभावस्य, लाभभावस्य च उत्कृष्टं फलचिन्तनं प्रतिपादितं तथैव अन्येषु भावेषु अपि कल्पनीयम्। यथा –

(१) लग्नेशः द्वितीयभावस्य स्वामिना सह द्वितीये धनभावे एकस्मिन् एव द्रेष्काणे स्थितः भवति चेत् धनलाभः भवति इति निर्णेतव्यम्।

(२) लग्नेशः तृतीयभावस्य स्वामिना सह तृतीये एव भावे, एकस्मिन्नेव द्रेष्काणे स्थितः भवति चेत् भातृसुखं पराक्रमादिबलात् सुखं च वक्तव्यम्।

(३) लग्नेशः चतुर्थेशश्च चतुर्थभावे एकस्मिन् एव द्रेष्काणे भवतः तदा गृह-वाहनादिसुखं निर्णेतव्यम्।

अनेन एव क्रमेण प्रत्येकम् अपि भावस्य विषये विशेषविचारः कर्तव्यः ज्योतिषिकैः। तद्विचार्य पृच्छकस्य प्रश्नस्य समुचितं फलं निर्णेतव्यम्।

१६.८ फलादेशार्थं दैवज्ञस्य कर्तव्यम्

ज्योतिषिकस्य अपरं नाम दैवज्ञः भवति। दैवम् अर्थात् भाग्यम्, तं जानाति इति दैवज्ञः। समाजे विद्यमानस्य प्रत्येकम् अपि जनस्य पूर्वजन्मनि कृतकर्मणां फलं निरूप्य भविष्ये क्रियमाणस्य कर्मणः निमित्तं प्रेरयति दैवज्ञः एव। सः प्रकृतेः ग्रहाणां च स्थिति-गत्यादिकं सम्यक्तया विज्ञाय तस्य प्रभावम् अपि प्रतिपादयति। यस्मात् जनानां दैवज्ञेषु स्वाभाविकी श्रद्धा उत्पद्यते। अतः दैवज्ञस्य कर्तव्यं भवति यत् सः विविधगुणसंयुतः स्वकर्मणि च निष्ठावान् स्यात्। तेषामेव गुणानां कर्तव्यानां च निरूपणम् अत्र क्रियते। तद्यथा –

मूलपाठः –

"कुलदेशानुसारेण तथा कालानुसारतः।
फलं बुद्ध्यानुसन्धेयं स्वमानं रक्षता विदा॥"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदच्छेदः – कुल-देश-अनुसारेण, तथा, काल-अनुसारतः, फलम्, बुद्ध्या, अनुसन्धेयम्, स्वमानम्, रक्षता, विदा।

अन्वयः – कुलदेशानुसारेण तथा कालानुसारतः स्वमानं रक्षता विदा बुद्ध्या फलम् अनुसन्धेयम्।

प्रतिपदार्थः – कुलदेशानुसारेण = स्वकीयस्य कुलस्य, स्थानस्य च परम्परायाः अनुसारेण, तथा च, कालानुसारतः = समयस्य अनुसारेण, स्वमानम् = स्वकीयं गौरवं सम्मानं वा, रक्षता = रक्षणं कुर्वता, विदा = दैवज्ञेन, बुद्ध्या = सम्यक् चिन्तनं कृत्वा, फलम् = शुभम् अशुभं च फलम्, अनुसन्धेयम् = अनुसन्धानपूर्वकं निर्णेतव्यम् इति।

भावार्थः – ज्योतिषिकः कथं फलनिर्देशं कुर्यात्? तस्य प्रमुखकर्तव्यानि कानि? फलकथनस्य रीतिः का? इत्यादीनां प्रश्नानां समाधानार्थं आचार्यः जीवनाथझावर्यः विविधान् विचारान् प्रतिपादितवान्। तद्यथा –

दैवज्ञः कुलानुसारम्, देशानुसारं कालानुसारं च फलं कथयेत् इति। अर्थात् केषु कुलेषु देशेषु च कीदृशः व्यवहारः प्रचलति इति ज्ञात्वा एव फलं वदेत्। दैवज्ञः देशवित् स्यात् इति वराहमिहिराचार्यः अपि प्रतिपादयति। हिमालयीय-प्रदेशानां वातावरणं कीदृशम्? मध्यदेशादिषु जना कथं व्यवहरन्ति? तत्रत्या भौगोलिकस्थितिः, कीदृशी? इत्यादिकं सर्वं ज्ञात्वा एव दैवज्ञः फलं कथयेत्। दैवज्ञः कालवित् अति स्यात् अर्थात् पूर्वाह्णे, मध्याह्ने अपराह्णे च वातावरणं कथं भवति? घर्मकाले शीतकाले वर्षाकालादिषु च इदं क्रियते इदं न क्रियते इति सम्यक् जानीयात्।

एवं प्रकारेण कुल-स्थान-कालादिकं सर्वं सम्यक्तया परिशील्य शास्त्रम् अधीत्य एव फलादेशं कुर्वाणः स्वगौरवं रक्षयित्वा एव फलादेशं कुर्यात्।

१६.९ ग्रन्थोपसंहारः

प्रियच्छात्र! आचार्येण जीवनाथझावर्येण विरचितः अयं 'प्रश्नभूषण' नामकः ग्रन्थः भवता चतुर्षु खण्डेषु पूर्णरूपेण एतावत् पर्यन्तं पठितः। सम्प्रति अस्य ग्रन्थस्य अन्ते उपसंहारं कुर्वन् आचार्यः ग्रन्थनिर्माणक्रमं स्वयं प्रस्तौति। तत्रापि के-के ग्रन्थाः जीवनाथझावर्येण रचिताः? प्रश्नभूषणग्रन्थस्य रचनायाः किं प्रयोजनम्? इत्यादयः अंशाः सम्प्रति प्रतिपाद्यन्ते। तद्यथा –

मूलपाठः –

कृत्वा जातकदर्पणं प्रथमतः श्रीजीवनाथः कृती
रम्यं भावकुतूहलं च परतः पाराशरीवासनाम्।
विद्वच्चक्रमनोविनोदकरणं छात्रानुकम्पावशा-
दन्यत्प्रश्नविभूषणं मुनिमतं ज्ञात्वा परं निर्ममे॥

पदच्छेदः – कृत्वा, जातक-दर्पणम्, प्रथमतः, श्रीजीवनाथः, कृती, रम्यम्, भाव-कुतूहलम्, च, परतः, पाराशरी, वासनाम्, विद्वत्-चक्र-मनो-विनोद-करणम्, छात्र-अनुकम्पा-वशात्, अन्यत्, प्रश्न-विभूषणम्, मुनि-मतम्, ज्ञात्वा, परम्, निर्ममे।

अन्वयः – श्रीजीवनाथः प्रथमतः जातकदर्पणं कृत्वा परतः रम्यं भावकुतूहलं पाराशरीवासनां च (कृत्वा) छात्रानुकम्पावशात् विद्वच्चक्रमनोविनोदकरणम् अन्यत् प्रश्नविभूषणं मुनिमतं ज्ञात्वा निर्ममे।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपदार्थः – श्रीजीवनाथः = प्रश्नभूषणग्रन्थस्य रचनाकारः, प्रथमतः = सर्वप्रथमम्, जातकदर्पणम् = जातकदर्पणनामकं ज्योतिश्शास्त्रीयं ग्रन्थम्, कृत्वा = रचयित्वा, परतः = ततः परम्, रम्यम् = रमणीयम् उपयोगिनं वा, भावकुतूहलम् = भावकुतूहलनामकं ग्रन्थम्, पाराशरीवासनाम् = पाराशरीयस्य ग्रन्थस्य उपपत्तिं व्याख्यां वा कृत्वा, छात्रानुकम्पावशात् = विद्यार्थीनाम् उपरि अनुकम्पाम् अनुग्रहं वा कर्तुम्, विद्वच्चक्रमनोविनोदकरणम् = विदुषां समुदायस्य मनसः प्रसन्नतार्थं च, अन्यत् = अपरम्, प्रश्नविभूषणम् = प्रश्नभूषणनामकं ग्रन्थम्, मुनिमतम् = प्राचीनानाम् आचार्येण मतम्, ज्ञात्वा = अवगत्य, निर्ममे = रचयामि।

भावार्थः – प्रश्नभूषण-ग्रन्थस्य अन्तिमे श्लोके आचार्यः जीवनाथझावर्यः स्वीयकृतीनां परिचयं अस्य ग्रन्थस्य निर्माणक्रमं च प्रतिपादयति। श्रीमता जीवनाथझावर्येण सर्वप्रथमतया 'जातकदर्पण'-नामकस्य ग्रन्थस्य रचना कृता। तदनन्तरम् अत्यन्तं रमणीयस्य उपयोगिनश्च ग्रन्थस्य 'भावकुतूहलस्य' निर्माणं कृतम्। ततः परं पाराशरीयग्रन्थस्य उपपत्तिः निर्मिता। अन्ते च प्रश्नभूषणग्रन्थस्य रचना कृता।

प्रश्नभूषणग्रन्थस्य रचनानिमित्तं मुख्यं प्रयोजनम् आसीत् छात्राणाम् उपकारः। अर्थात् मुख्यतः छात्राणाम् उपयोगाय एव अयं ग्रन्थः सरलया भाषया रमणीयया च शैल्या आचार्येण रचितः। अपरं च प्रयोजनम् आसीत् विदुषां तोषणम्। विदुषां समवायस्य मनसः प्रसन्नतार्थमपि अयं प्रश्नभूषणग्रन्थः आचार्यैः रचितः इति विशेषः।

बोधप्रश्नाः

१९. 'गणकोत्तमः' इति पदस्य अर्थः कः?

२०. लग्नेश-धनेशयोः धनभावे एकद्रेष्काणस्थितिवशात् किं फलं भवति?

२१. द्रेष्काणवशात् गृहवाहनादिसुखस्य निर्णयार्थं चतुर्थभावे केषां स्थितिः अपेक्षिता भवति?

२२. केषाम् अनुसारेण दैवज्ञः फलं कथयेत्?

२३. आचार्येण जीवनाथझावर्येण सर्वप्रथमं कः ग्रन्थः रचितः?

२४. मुख्यतः केषामुपयोगाय प्रश्नभूषणग्रन्थस्य रचना कृता?

मूलपाठः–

''द्वाविंशतिदृकाणस्थः प्रश्नलग्नेश्वरो यदि।
तदा मृत्युं विजानीयादवश्यं रोगिणो बुधः॥''

''तावेव निधने स्यातामेकद्रेष्काणगौ यदि।
तदा मृत्युर्भवेदेव रोगिणो नाऽत्र संशयः॥''

''लग्नाष्टमपती लग्ने स्थितावेकत्र रोगिणाम्।
दृक्काणे मरणं न स्यादित्युक्तं पूर्व-सूरिभिः॥''

''लग्नलाभाधिपावेकदृकाणे लाभगौ यदि।
प्रश्नकर्तुस्तदा लाभो भविष्यति न संशयः॥''

''एवं लग्नेशपुत्रेशावेकद्रेष्काणसंस्थितौ।
पञ्चमे पुत्रलाभः स्यादनायासेन पृच्छतः॥''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवं सर्वेषु भावेषु दृकाणैरेव केवलैः।
तत्तद्भावफलं प्रष्टुर्वक्तव्यं गणकोत्तमैः॥

''कुलदेशानुसारेण तथा कालानुसारतः।
फलं बुद्ध्यानुसन्धेयं स्वमानं रक्षता विदा॥''

कृत्वा जातकदर्पणं प्रथमतः श्रीजीवनाथः कृती
रम्यं भावकुतूहलं च परतः पाराशरीवासनाम्।
विद्वच्चक्रमनोविनोदकरणं छात्रानुकम्पावशा-
दन्यत्प्रश्नविभूषणं मुनिमतं ज्ञात्वा परं निर्ममे॥

१६.१० सारांशः

अस्मिन् समाजे विविधैः क्लेशैः पीडिताः जनाः क्लेशानां कारणम् अवगन्तुं, ग्रहाणां च तेषाम् उपरि प्रभावं ज्ञातुं दैवज्ञं पृच्छन्ति, समाधानं च प्राप्नुवन्ति। दैवज्ञः अपि ग्रहचारम् अवलोक्य भाव-स्थान-दृष्टि-योगादिवशात् बहुविधं चिन्तनं कृत्वा फलं निर्णेतुं समर्थो भवति। फलादेशस्य प्रसङ्गे सूक्ष्मरूपेण फलचिन्तनं कर्तुं द्रेष्काणस्य अत्यधिकं महत्त्वं प्रतिपादितं वर्तते सर्वैः अपि प्राचीनैः आचार्यैः। अतः द्रेष्काणवशात् विशिष्टं फलचिन्तनं कथं क्रियते इत्येव अस्मिन् पाठे विस्तरेण निरूपितम् अस्ति।

सर्वादौ पृच्छकस्य रोगविषयकप्रश्नस्य फलनिर्णयार्थं योगाः प्रतिपाद्यन्ते।

१. यदि प्रश्नलग्नस्य स्वामी अष्टमस्थाने प्रथमे द्रेष्काणे विद्यमानः भवति तदा रोगिणः मृत्युः अवश्यं भवति।

२. रोगिणः जीवन-मरणयोः प्रश्ने यदि प्रश्नकालिकस्य लग्नस्य स्वामी, अष्टमभावस्य च स्वामी अष्टमस्थाने एकस्मिन्नेव द्रेष्काणे तिष्ठतः, तदाऽपि रोगिणः निश्चयपूर्वकं मरणं निर्णेतव्यम्।

३. यदि लग्नेशः अष्टमेशश्च लग्ने एकस्मिन्नेव द्रेष्काणे तिष्ठतः तदा रोगिणः मरणं न भवति इति फलं वक्तव्यम्।

अन्येषु योगेषु द्रेष्काणवशात् लाभयोगाः विचार्यन्ते। प्रश्नलग्नेशः लाभेशश्च (एकादशभावस्य स्वामी) यदि लाभस्थाने एकद्रेष्काणे तिष्ठतः तदा पृच्छकस्य अवश्यं लाभः वक्तव्यः। अयमेव क्रमः पुत्रलाभे अपि स्वीकर्तव्यः। यदि लग्नेशः पुत्रेशः (पञ्चमभावस्य स्वामी) च पञ्चमभावे एकस्मिन्नेव द्रेष्काणे तिष्ठतः तदा अत्यन्तं सुलभतया पृच्छकस्य पुत्रप्राप्तिः भवति इति वक्तव्यम्। अनेन एव प्रकारेण लग्नेशेन सह तत्तद्भावस्य स्वामिनः तस्मिन् एव भावे एकस्मिन् एव द्रेष्काणे युतिवशात् तत्तद्भावस्य अभिवृद्धिः निर्णेतव्या। येन फलनिर्णयः अत्यन्तं सूक्ष्मरूपेण कर्तुं शक्यते।

स्फुटतया सूक्ष्मतया च फलादेशार्थं दैवज्ञे केचन गुणाः अनिवार्याः भवन्ति। तस्य मुख्यं कर्तव्यं भवति निजगौरवस्य रक्षणम्। फलादेशात् पूर्वं दैवज्ञः कुलस्य, देशस्य, तत्समयस्य च सम्यक् ज्ञानं प्राप्य एव स्वविवेकानुसारं फलनिर्णयं कुर्यात्।

अन्ततः अस्य ग्रन्थस्य उपसंहारे आचार्यस्य जीवनाथझावर्यस्य कृतीनां परिचयः प्राप्यते। आचार्येण सर्वप्रथमतया 'जातकदर्पण'नामकः ग्रन्थः रचितः, तदनन्तरं रमणीयः भावकुतूहलग्रन्थः, ततः परं पाराशरीयग्रन्थस्य व्याख्या कृता, सर्वान्ते च छात्राणाम् उपकाराय, विदुषां च मनसः प्रसन्नतायै अयं प्रश्नभूषणनामकः ग्रन्थः रचितः। एवम्प्रकारेण अस्मिन् पाठे

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्रेष्काणवशात् विविधयोगाः प्रतिपादिताः सन्ति। ततः दैवज्ञस्य कर्तव्यं ग्रन्थकारस्य च परिचयः उल्लिखितः वर्तते।

१६.११ शब्दावली

१.	दृकाणस्थः	–	द्रेष्काणे स्थितः।
२.	पूर्वसूरिभिः	–	पूर्वतनैः आचार्यैः।
३.	एकद्रेष्काणगौ	–	एकस्मिन् द्रेष्काणे स्थितौ।
४.	लाभाधिपः	–	एकादशभावस्य स्वामी।
५.	पुत्रेशः	–	पञ्चमभावस्य स्वामी।
६.	अनायासेन	–	सुलभतया।
७.	प्रष्टुः	–	प्रश्नकर्तुः, पृच्छकस्य वा।
८.	गणकोत्तमः	–	उत्तमः ज्योतिषिकः।
९.	विदा	–	विदुषा, अथवा ज्योतिशास्त्रज्ञेन।
१०.	अनुसन्धेयम्	–	विश्लेषणपूर्वकं कथनीयम्।
११.	परतः	–	अनन्तरम्।
१२.	मनोविनोदः	–	मनसः आह्लादः।
१३.	मुनिमतम्	–	प्राचीनाचार्याणां कथनम्।
१४.	निर्ममे	–	रचितवान्।

१६.१२ सन्दर्भग्रन्थः

१. **प्रश्नभूषणम्** – दैवज्ञजीवनाथझाप्रणीतम्, 'प्रेक्षा' 'सौम्या' संस्कृत-हिन्दीव्याख्योपेतम्, व्याख्याकारः – आचार्यः गुरुप्रसादगौडः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७।

१६.१३ सहायकग्रन्थाः

१. **प्रश्नमार्गः**, हिन्दीव्याख्याकारः – आचार्यः गुरुप्रसादगौडः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७।

२. **बृहज्जातकम्**, दैवज्ञवराहमिहिररचितम्, सम्पादकः – सत्येन्द्रमिश्रः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१४।

१६.१४ बोधप्रश्नोत्तराणि

१. षोडशः।

२. वराहमिहिरेण।

३. लग्नम्, होरा, द्रेष्काणः, नवांशः, त्रिंशांशः, द्वादशांशः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४. नवांशस्य।

५. राशेः त्रिभागः द्रेष्काणः स्यात्।

६. दशः (१०) अंशानाम्।

७. भौमः।

८. रोगिणः मृत्युः।

९. षड्त्रिंशत् (३६)।

१०. अष्टमभावस्य।

११. अष्टमे भावे।

१२. रोगिणः मरणं जायते।

१३. रोगिणः मरणं न भवेत्।

१४. एकादशभावस्य स्वामी।

१५. अत्यन्तं लाभः भवति।

१६. एकादशभावस्य।

१७. अनायासेन पुत्रलाभः।

१८. पञ्चमभावस्य।

१९. उत्तमः ज्योतिषिकः।

२०. धनलाभः।

२१. लग्नेशस्य चतुर्थेशस्य च।

२२. कुल-देश-कालानुसारेण।

२३. जातकदर्पणम्।

२४. छात्राणाम् उपयोगाय।

१६.१५ अभ्यासप्रश्नाः

१. द्रेष्काणवशात् रोगिणः मरणयोगान् वर्णयत।

२. पुत्रलाभार्थं ग्रहाणां कीदृशः योगः आवश्यकः इति सप्रमाणं वर्णयत।

३. सर्वेषाम् अपि भावानां फलकथनं द्रेष्काणमात्रस्य आधारेण सम्भवति न वा? सोदाहरणं स्पष्टयत।

४. फलनिर्देशार्थं दैवज्ञस्य कर्तव्यं प्रतिपादयत।

५. आचार्यजीवनाथझावर्येण रचितान् ग्रन्थान् क्रमशः तेषां प्रयोजन-उल्लेख-पूर्वकं लिखत।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वप्नः

संस्कृते पारम्परिक-आधुनिकज्ञानवैदुष्यस्य समन्वयनदृशा संस्कृतशिक्षायाः वैश्विकपरिप्रेक्ष्यस्य उपस्थानम्।

सङ्कल्पः

- संस्कृतनिष्ठज्ञानसरण्याः उत्तमावबोधस्य सर्जनम्।
- संस्कृतशिक्षान्तर्गतानाम् अभिनवविषयाणां संवर्धनम्।
- आधुनिकसमाजोत्कर्षाय सम्भावनानां प्रकाशनदृष्ट्या संस्कृतभाषायाः तत्साहित्यस्य च प्रासङ्गिकतायाः आविष्करणम्।

Kirtikant Sharma Collection, Najafgarh